निर्णयसागरेऽङ्कितानि विक्रेयसंस्कृतपुस्तकानि ।

चरकसंहिता ।

अग्निवेशमहर्षिकृता, चरकप्रतिसंस्कृता, चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाव्याख्यया समलंकृता ।

मूल्यं ८ रूप्यकाः, मार्गव्ययः १ रूप्यकः ।

सर्वेष्वायुर्वेदनिबन्धेष्वयं ग्रन्थो महत्त्वेन प्राधान्येन च वरीवर्ति । प्राचीनस्यास्यातिगाम्भीर्येण दुरवगाहत्वात्सर्वेषामध्ययनाध्यापनयोरतीवासौकर्यमासीत् तन्मार्जनार्थं प्रयतमानैरस्माभिर्महता प्रयत्नेनोपरि निदर्शितनाम्नी व्याख्या लब्धा तां भिषग्वरद्वारा संयोज्य संशोधय्य च प्रकाशितास्ति ।

मीमांसाशास्त्रसारः ।

(निर्वीतान्तमीमांसासिद्धान्ततत्त्वार्थप्रकाशः)

मूल्यं १ रूप्यकः, मार्गव्ययः ४ आणकाः ।

अधीतेष्वपि बहुग्रंथेष्ववसरे कस्यापि निर्णयो यथावन्मीमांसाज्ञानमंतरा दुःशक एव । प्रायः पूर्वमीमांसोत्तरमीमांसयोर्ज्ञानमतीव दुरवगममेवास्तीति व्युत्पित्सवोत्र विषये प्रवेशाभावादत्यन्तमुदासते तेन संप्रति मीमांसाशास्त्रं नामशेषमिव बभूव । अतोऽत्र सहजप्रवेशेन तत्प्रावण्यार्थमयं ग्रन्थो वेदान्तविशारदबिरुदेन अनन्तकृष्णशास्त्रिनाम्ना सुलभया रीत्या विरचितोस्ति ।

भाट्टदीपिका ।

महामहोपाध्यायसर्वतन्त्रस्वतन्त्रखण्डदेवप्रणीता श्रीशम्भुभट्टप्रणीतप्रभावलीव्याख्या

(निर्वीतान्तो भागः १)

मूल्यं ६ रूप्यकाः, मार्गव्ययः १ रूप्यकः ।

अखिलेष्वपि वाङ्मयेषु सुप्रसिद्धानां षड्दर्शनानामेव सिद्धेपि महत्त्वे मीमांसादर्शनमेव तेषूच्चपदमारोहति । भाट्टसांप्रदाये प्रणीतमीमांसानिबद्धसिद्धान्तानूहापोहैः खण्डदेवेनात्रैव समीचीनतया समावेशः कृतोस्ति । अग्रे च तच्छात्रेण शंभुभट्टेन प्रभावलीनाम्ना मूलग्रन्थादर्शरूपया सनाथीकृत्यायं ग्रन्थोस्माभिर्मुद्रितोस्ति ।

पाण्डुरङ्ग जावजी,
निर्णयसागरयन्त्रालयाधिपतिः ।

(१३०६७)

VII-A Sks. ya

काव्यमाला ८६.

श्रीहरीहरविरचितं

हरिहरसुभाषितम् ।

मूल्यं ८ आणकाः ।

Revised Price Rs. 0-12

KÂVYAMÂLÂ 86.

THE
HARIHARASUBHÂSHITAM
OF
HARIHARA.

EDITED BY

PAṆḌIT KEDÂRNÂTH

AND

WÂSUDEVA LAXMAṆA SHÂSTRÎ PAṆASHÎKAR.

Second Edition.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR "NIRṆAYA-SÂGAR" PRESS.

BOMBAY.

PRINTED BY B. R. GHÂNEKAR AT THE "NIRṆAYA-SÂGAR" PRESS,
FOR THE PUBLISHER.

1910.

Price 8 Annas.

काव्यमाला. ८६.

श्रीहरिहरविरचितं

हरिहरसुभाषितम् ।

जयपुरनिवासिसाहित्योपाध्यायपण्डितकेदारनाथशर्मणा
पणशीकरोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा
च संशोधितम् ।

(द्वितीयावृत्तिः ।)

तच्च

मुंबय्यां

तुकाराम जावजी

इत्येतेषां कृते तेषामेव निर्णयसागराख्ययन्त्रालये बालकृष्ण
रामचंद्र घाणेकर इत्यनेन मुद्रयित्वा प्रकाशितम् ।

शाकः १८३१ खिस्ताब्दः १९१०

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यं ८ आनाः ।

श्रीहरिहरसुभाषितस्य

विषयानुक्रमः

प्रकरणसंख्या.		पृष्ठसंख्या.
१	मङ्गलप्रकरणम्	१
२	बालविनयप्रकरणम्	३
३	सुहृदुपदेशप्रकरणम्	८
४	प्रवासप्रकरणम्	११
५	राजप्रशस्तिप्रकरणम्	१६
६	राजोपासनप्रकरणम्	२१
७	राजनीतिप्रकरणम्	२४
८	समयवर्णनप्रकरणम्	२९
९	शृङ्गारवर्णनप्रकरणम्	३६
१०	नायकनायिकाभेदप्रकरणम्	४२
११	प्रकीर्णकप्रकरणम्	४९
१२	परमार्थप्रकरणम्	५६

काव्यमाला ।

श्रीहरिहरविरचितं
हरिहरसुभाषितम् ।

पायाज्जाया पयोजातजन्मनो मन्मनो मुदम् ।
शारदा पारदासारतुल्यधावल्यधारिणी ॥ १ ॥
गोविन्दाख्यानपीयूषप्लवैरिव सितीकृताम् ।
व्यासादिवदनाम्भोजभ्रमरीं भारतीं भजे ॥ २ ॥
गौरीगिरीशयोरेकमङ्कालंकारकारणम् ।
मदवारिझरोद्गारमयं वस्तु वयं स्तुमः ॥ ३ ॥
गण्डकण्डूयनोत्खातमेरुमूलान्तशायिनम् ।
पायाद्गणेशितुः शेषं बिसमित्यामृशन्करः ॥ ४ ॥
स्तुमस्ते लोचने विष्णोर्विना याभ्यां जगन्त्यपि ।
अन्धीयन्त्यप्रतीकारं चारुलोचनवन्त्यपि ॥ ५ ॥
सामुद्रेषु सुजन्मानमेकं श्रीकौस्तुभं स्तुमः ।
नारायणोरःस्थेनापि येनालंक्रियतेऽम्बुधिः ॥ ६ ॥
नीलिमानमहं वन्दे तं देवस्य मुरद्विषः ।
तदाप्लवादिव प्राप्तं यमुना यं न मुञ्चति ॥ ७ ॥
प्रीयतां श्रीर्यया विश्वं वशीकृत्य लघूकृतम् ।
किमन्यद्विश्वधृग्वक्षःकस्तूरीमकरीकृतः ॥ ८ ॥
स पायात्पार्वतीपाणिः फणिकङ्कणिना धृतः ।
सात्त्विकेषु विकारेषु त्रासो यत्रास निह्नवः ॥ ९ ॥
शिवायाः शवतापन्नमपि यन्न जहौ हरः ।
वपुस्तन्नौमि येनान्तःस्फोटः कैटभजित्कृतः ॥ १० ॥

कलां तामैन्दवीं वन्दे यया यादःपतिः पिता ।
आरुह्य हरमूर्धानं कृतस्त्रैलोक्यमूर्धनि ॥ ११ ॥
जगत्पतिपदस्पर्शजातामर्षेव जाह्नवी ।
जयत्यम्बुकणैर्जन्तूञ्जनयन्ती जगत्पतीन् ॥ १२ ॥
विसृजन्त्याः पुरा यस्या ब्रह्माण्डाण्डानि वारिधौ ।
सूतिखेदारवो वेदास्तां मात्सीमूर्तिमाश्रये ॥ १३ ॥
तं स्तुमः कमठं यस्मिन्नास्ते सगिरिसागरा ।
मन्थाचलकिणक्रोडमग्ना मृदिव मेदिनी ॥ १४ ॥
स क्रोडः क्रीडतां दन्तक्रान्तकल्पाब्धिपल्वलः ।
यद्दन्तलग्नजम्बालक्षोदालम्बा जगत्त्रयी ॥ १५ ॥
विदारयन्हरिः पातु हिरण्यकशिपोरुरः ।
तदन्तर्गतमात्मीयं द्वेषमन्वेषयन्निव ॥ १६ ॥
नमाम वामनं धाम त्रिभिस्त्रिभुवनं पदैः ।
वामनीकृत्य कथिता येनात्मनि तदात्मता ॥ १७ ॥
स्तुमस्तमुद्यमे यस्य त्रासात्त्रिःसप्तधा व्यधात् ।
क्षत्रियक्षतजाम्भोधावन्तर्धानं वसुंधरा ॥ १८ ॥
स पातु यः प्रतापाग्निपाकपिण्डीकृताम्भसम् ।
सेतुना पुनरुक्तेन ततार क्षारवारिधिम् ॥ १९ ॥
तं नौमि यमुना यस्य लाङ्गलाग्रापवर्तिता ।
उपास्य पादावभजद्भङ्गासंगमयोग्यताम् ॥ २० ॥
बुद्धमुद्बुद्धकारुण्यरसावासमुपास्महे ।
अहिंसा दीर्घसंसारदारिणी येन दर्शिता ॥ २१ ॥
निःशेषोन्मूलितम्लेच्छं करिष्यन्नवनीतलम् ।
करवालकरः कल्की भिनत्तु कलिकल्मषम् ॥ २२ ॥
मत्स्यादयो दशाप्यंशा यस्य कंसान्तकारिणः ।
तं कुक्षिकुहरक्षिप्तद्विसप्तभुवनं भजे ॥ २३ ॥

स्तनपं क्षणमङ्केन वोढुं म्लायन्ति मातरः ।
जयत्युर्वीयमक्लिष्टं पुष्णात्यामरणं जगत् ॥ २४ ॥
मृतानुगामि तन्नौमि शंभोरम्भोमयं वपुः ।
आत्मव्ययेन यज्जन्तोरन्तःशैत्याय जायते ॥ २५ ॥
विश्वजीवननिर्बन्धमहं गन्धवहं भजे ।
चेष्टतेऽधिष्ठितं येन सहजेन जडं जगत् ॥ २६ ॥
तद्व्योम व्योमकेशस्य वयं वन्दामहे वपुः ।
पूर्त्यै यदेकदेशस्य नालं ब्रह्माण्डकोटयः ॥ २७ ॥
नमश्चन्द्रमसे तस्मै यस्मै दक्षोटिकैतवात् ।
अर्पयन्ति जगन्ति द्रागुन्निद्राम्बुरुहाञ्जलीन् ॥ २८ ॥
सौरी जयत्यसौ रीतिः शश्वद्विश्वविलक्षणा ।
यज्जगद्बोधनायास्य निरालम्बेऽम्बरे भ्रमिः ॥ २९ ॥
स्वर्वासिनां हविर्भागवहनं दहनं स्तुमः ।
दहन्तमपि यं नित्यमुपजीवन्ति जन्तवः ॥ ३० ॥
होत्रा नस्त्राणकृद्भूयाद्वपुषा स वृषाकपिः ।
जज्ञे यज्ञेन रूपेण यत्कृते प्रकृतेः परः ॥ ३१ ॥
इलाजलानलव्योमसोमसूर्याग्निमूर्तिभिः ।
अस्मान्विस्मारयत्वेकः कष्टमीशोऽष्टमूर्तिभिः ॥ ३२ ॥

इति श्रीहरिहरसुभाषिते मङ्गलप्रकरणम् ॥ १ ॥

अन्तःप्रकाशमिच्छन्तः सदसच्च विवेचितुम् ।
स्नेहं सूक्तिप्रदीपेऽस्मिन्वर्धयन्तु सुबुद्धयः ॥ १ ॥
उच्चैःस्थितीनां विदुषां पदमारोढुमिच्छवः ।
मत्सुभाषितसोपानसेविनः सन्तु साधवः ॥ २ ॥
समाजेभ्यः सुमनसां सुभाषितमयं मधु ।
यावज्जीवं विचिन्वन्ति साधवो मधुपा इव ॥ ३ ॥

लक्षैर्बन्धकितं बध्वा भारवीयं सुभाषितम् ।
प्रक्रान्तपुत्रहत्याघं निशि माघं न्यवारयत् ॥ ४ ॥
सुभाषितमधून्येव जनो यद्यवमन्यते ।
रसनामात्मनः केन रसेनोपकरिष्यति ॥ ५ ॥
सुभाषितामृतास्वादसुखसंमुखचेतसः ।
संभावयन्ति पीयूषमप्यूषरजलायितम् ॥ ६ ॥
सुभाषितगुणेनैव मुनेर्वल्मीकजन्मनः ।
नद्धमद्यापि नापैति रामायणमयं यशः ॥ ७ ॥
भारताख्यं सरो भाति व्यासवागमृतैर्वृतम् ।
यत्र क्षत्रकुलाब्जेषु हंसीयति हरेर्यशः ॥ ८ ॥
न कस्यानुमतः काव्ये गुणो हनुमतः कवेः ।
यद्रसोऽन्तश्चिरं मग्नैरुपलैरपि धार्यते ॥ ९ ॥
प्रसादोत्कर्षमधुराः कालिदासीर्वयं स्तुमः ।
पीतवाग्देवतास्तन्यरसोद्गारायिता गिरः ॥ १० ॥
दण्डीत्युपस्थिते सद्यः कवीनां कम्पतां मनः ।
प्रविष्टे त्वान्तरं बाणे कण्ठे वागेव रुद्ध्यते ॥ ११ ॥
भ्राम्यन्तु मारवग्रामे विमूढा रसमीप्सवः ।
अमरुद्देश एवासौ सर्वतः सुलभो रसः ॥ १२ ॥
जडानामपि चैतन्यं भवभूतेरभूद्गिरा ।
ग्रावाप्यरोदीत्पार्वत्या हसतः स्म स्तनावपि ॥ १३ ॥
नैतच्चित्रमहं मन्ये माघमासाद्य यन्मुहुः ।
प्रौढतातिप्रसिद्धापि भारवेरवसीदति ॥ १४ ॥
गाश्चारयंश्चिरादासीत्कामं गोवर्धनः क्षितौ ।
सोऽप्यर्थवान्बभूवाहो शालिवाहोपजीवनात् ॥ १५ ॥
रसैर्निरन्तरं कण्ठे गिरा श्लेषैकलग्नया ।
सुबन्धुर्विदधे दृष्ट्वा करे बदरवज्जगत् ॥ १६ ॥

आकर्ण्य जयदेवस्य गोविन्दानन्दिनीर्गिरः ।
बालिशाः कालिदासाय स्पृहयन्तु वयं न तु ॥ १७ ॥
संपूरयन्तु धामैव धावकस्य धनैर्गिरः ।
गिरे मुरारेर्दारिद्र्यस्पृशेऽपि स्पृहयामहे ॥ १८ ॥
अर्थार्थिनां प्रिया एव श्रीहर्षोदीरिता गिरः ।
सारस्वते तु सौभाग्ये प्रसिद्धा तद्विरुद्धता ॥ १९ ॥
नवीनामनवीनां वा कवीनां लुम्पतां स्मृतिम् ।
नैव शंकरमिश्रेण शंकराचार्यविस्मृतिः ॥ २० ॥
सन्तु शास्त्रविदः श्रेष्ठाः प्रतिष्ठा कापि काव्यतः ।
ख्यातिः किं कालिदासस्य कृता टीकाकृताप्यधः ॥ २१ ॥
हृद्याः सन्तु शतं विद्याः काव्यादव्याहतं यशः ।
निपीतदर्शनग्रामे देहि रामेश्वरे दृशम् ॥ २२ ॥
सत्काव्यं राज्यमित्याहुः कवयो न मयोच्यते ।
तृप्यत्यर्थं कविर्ध्यायन्नैवं राजा तु जात्वपि ॥ २३ ॥
तत्पिबन्त्वमृतं देवाः काव्यमेवामृतं भुवि ।
यत्संबन्धेन जीवन्ति भोजराज़ादयो मृताः ॥ २४ ॥
के नायुद्ध्यन्न कः प्रादान्नृपोऽनादावनेहसि ।
अनाराध्य कविं कस्य चिरं क्रीडन्ति कीर्तयः ॥ २५ ॥
वशीकरणमेकं हि जगतो यदि पृच्छसि ।
सुभाषितानि सम्यञ्चि संचिन्वानः समभ्यस ॥ २६ ॥
चमत्करोति केषांचित्सुकृतेन सुभाषितम् ।
दुर्लभं पुनरेतस्य वैलक्षण्यपरीक्षणम् ॥ २७ ॥
सुकृतेन कुले जन्म सुकृतेन सुभाषितम् ।
सुकृतेन सती भार्या सुकृतेन कृती सुतः ॥ २८ ॥
कुलशीलश्रुताचारवतां किल सतां कुले ।
चिरादाराध्य जायन्ते पुरुषाः पुरुषोत्तमम् ॥ २९ ॥

तपत्युपरि संसारदुःखसंभारभास्वति ।
पूर्वपुण्यतरुच्छाया साध्वी जाया सुजन्मनः ॥ ३० ॥
ग्रामस्याधिर्गृहव्याधिः कटुवाणी कुटुम्बिनी ।
हृत्कुठारः कुलाङ्गारः सुतः साधुपथच्युतः ॥ ३१ ॥
विना शीलेन वनिता वाग्मिता विद्यया विना ।
विनियोगैर्विना वित्तं मास्तु कस्यापि जीविनः ॥ ३२ ॥
सत्कुलं भूषणं पुंसः सद्भार्या कुलभूषणम् ।
सत्पुत्रभूषणा भार्या पुत्राः सन्मतिभूषणाः ॥ ३३ ॥
पुन्नाम्नो नरकादेव पुत्रा न त्राणकारिणः ।
विस्मारयन्ति स्त्रीणां च नरकक्लेशमप्यमी ॥ ३४ ॥
शिशोः क्रीडनकैर्वेश्म कलालापैरपि श्रुतिः ।
वपुरङ्गरजोभिश्चेन्नाकुलं जगदाकुलम् ॥ ३५ ॥
बालैः परिहृतं वेश्म न श्मशानाद्विशिष्यते ।
यत्रस्था देहिनो नित्यं दह्यन्ते गतचेतसः ॥ ३६ ॥
न चन्द्रश्चन्द्रमाः पुत्रं चन्द्रमाहुर्मनीषिणः ।
दृष्टे स्पृष्टे श्रुते चोक्ते घ्राते यत्रेन्द्रियोत्सवः ॥ ३७ ॥
जातमात्रेण पुत्रेण कः प्रमोदो मनीषिणाम् ।
यदि नाम न विद्यादिगुणैः सार्धं स वर्धते ॥ ३८ ॥
अनिच्छन्तोऽपि विनयं विद्याभ्यासेन बालकाः ।
भेषजेनेव नैरुज्यं प्रापणीयाः प्रयत्नतः ॥ ३९ ॥
शनैः शनैर्विनीयन्ते तर्जनैस्तोषणैरपि ।
नवा इवाश्वाः कुशलैर्बालाश्चपलचेतसः ॥ ४० ॥
लालयेद्बालकं तावद्यावदत्र विमुग्धता ।
राजा प्रजास्विव प्रीतिं पश्चात्प्रच्छादयेत्पिता ॥ ४१ ॥
वरं वन्ध्यत्ववादोऽपि योषित्पुरुषयोस्तयोः ।
याभ्यां लालनलुब्धाभ्यां न विनीतः स्वयं सुतः ॥ ४२ ॥

वपूंषि जनयन्त्येव जन्तून्यूकादिकानपि ।
तेषु द्वेषवतः प्रीतिरविनीते सुते कुतः ॥ ४३ ॥
अप्यनेकैरुपचितैर्दुर्विनीतैः सुतैरलम् ।
निदर्शनं धार्तराष्ट्राः शतं दुर्योधनादयः ॥ ४४ ॥
एकेनापि विनीतेन सुतेनोद्भ्रियते कुलम् ।
गङ्गावतारणापारप्रथं पश्य भगीरथम् ॥ ४५ ॥
नीचैरेव परं सर्पत्पयोऽप्युच्चैर्नयेन्नरः ।
विरलास्तरलाक्षाणां बालानां शिक्षणे क्षमाः ॥ ४६ ॥
पुरा हि पतितः प्राह प्रवाहे निष्प्रतिक्रियः ।
बालान्नाध्यापयिष्यामो विपत्स्यामो वयं वरम् ॥ ४७ ॥
शिशोर्दुःशिक्षणीयत्वात्सोपेक्षो न क्षणं भवेत् ।
विपुलाय फलायालं कष्टकृष्टा वसुंधरा ॥ ४८ ॥
व्याहारेण विहारेण सदसत्संगमेन च ।
पुरः पुत्रं परीक्षेत चिरभाविनि पौरुषे ॥ ४९ ॥
यः पुरो मधुरोदारस्तेन भारः पितुर्धृतः ।
सान्द्रस्निग्धो नदन्धीरं नीरं क्षरति वारिदः ॥ ५० ॥
शिशौ प्रविशतः प्रायः प्रतिवेशिगुणागुणौ ।
गन्धोऽन्यसंनिधेरेव संक्रामति समीरणे ॥ ५१ ॥
कदाचित्साधुतामेति पुरः शिशुरसन्मतिः ।
प्राक्पाण्डुपुत्राः कुत्रापि चीयन्ते चारुभूरुहाः ॥ ५२ ॥
किमध्ययनहीनेन सुतेनातिसुबुद्धिना ।
तीक्ष्णेन करवालेन किं भीरुकरवर्तिना ॥ ५३ ॥
यावन्न यौवनप्राप्तः शिक्ष्यते तावदात्मजः ।
व्यतीतकाले केदारे कर्षणैः किं करिष्यते ॥ ५४ ॥
विनयन्तु सुतान्सन्तः स्वसंपाद्याः पुनर्गुणाः ।
सर्वे कृषाणाः कुर्वन्तु बीजं सूतेऽङ्कुरं स्वतः ॥ ५५ ॥

स्वयमेव समीहन्ते गुणान्भव्याय भाविनः ।
प्रगुणाय प्ररोहाय करीराः केन शिक्षिताः ॥ ५६ ॥

इति श्रीहरिहरसुभाषिते बालविनयप्रकरणम् ॥ २ ॥

सुचिरं सुखयति पुरुषं निपुणमधीतं वयःक्रमे प्रथमे ।
संतुष्यति कृषिकारः सत्समये साधुकृष्टकेदारः ॥ १ ॥
नाधीतं कैशोरे किमुपकरिष्यत्यनन्तरे वयसि ।
अङ्कुरनिहितकुठारः कतरो हि तरोः फलं लभते ॥ २ ॥
कुरु गुरुवचो निपीतं भूयो भूयो विचिन्तयाधीतम् ।
विद्या गुरूपदिष्टा चिरपरिमृष्टा विभूषणं विदुषः ॥ ३ ॥
यद्यप्यसि जडचेतास्तदपि न रे तात हेयमध्ययनम् ।
जङ्घाल एव शैलं न लङ्घते किं तु केऽपि गच्छन्तः ॥ ४ ॥
आत्मोपकारचतुरा नरा न गणयन्ति गुरुगृहक्लेशम् ।
वेधव्यथैव कियती श्रवसो ह्यवतंसभूषणीयस्य ॥ ५ ॥
क्व लघुः श्रियो विलासः क्व पुनर्विद्यारसोल्लासः ।
साक्ष्यं वदन्त्विदं च द्वितयेऽस्मिंस्तारतम्यसम्यञ्चः ॥ ६ ॥
उपदिशति लोकवृत्तं वितरति वित्तं विनोदयति चित्तम् ।
उत्तम्भयति महत्त्वं विद्या ह्या सुराजसेवेव ॥ ७ ॥
वरमेकैव निसृष्टा विद्येति ब्रूयुरल्पसंतुष्टाः ।
परिमितगुणपरितुष्टा न जात्वभीष्टोन्मुखाः पुरुषाः ॥ ८ ॥
एकामधीत्य विद्यां बिभेति बहुविद्यपरिषदं प्राप्तः ।
क्वासन्नशस्त्रनिकरः कुत्रैकशरः पुनः पुरुषः ॥ ९ ॥
विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य ।
मणिकाञ्चनसंयोगो जनयति लोकस्य लोचनानन्दम् ॥ १० ॥
अपि निपुणतरमधीतं दुर्विनयारूढचेतसः पुंसः ।
मणिरिव फणिफणवर्ती प्रभवति शोकाय लोकानाम् ॥ ११ ॥

विगुणा बहवोऽपि गुणा विना विनीतेन चेतसा पुंसः ।
निशितैरलं शरशतैरनुपेतपतञ्जिके धनुषि ॥ १२ ॥
भूषणमेव न कुरुते दूषणमप्यावृणोति विनयोऽयम् ।
भूषयति रुचिरमंशुकमङ्गान्यपि तानि किं न गोपयति ॥ १३ ॥
पुंसो विभूषणाय प्रसरत्येकोऽपि कोऽपि गुणः ।
वसुधावलयमलंकृतमनवरतगुणेन पुरुषरत्नेन ॥ १४ ॥
जननीजठरव्याधिर्बन्धूनामाधिरपगुणः पुरुषः ।
एतत्कृतो धरित्र्या भारो हरिणाप्यनपनेयः ॥ १५ ॥
यदि गुणमिच्छसि फलिनं कुलमकलङ्कं मनो निरातङ्कम् ।
अतिदूराद्गुरुदोषं परिवर्जय दुर्जनेषु परितोषम् ॥ १६ ॥
पिशुनप्रणयी पुरुषो यदि न विनश्यत्यवश्यमेति भयम् ।
यदि संनिहितं दहनो न दहति संतापयत्येव ॥ १७ ॥
परपरितापनकुतुकी गणयति नात्मीयमपि तापम् ।
परहतिहेतोः पिशुनः संदंश इव स्वपीडनं सहते ॥ १८ ॥
करलालितोऽपि दहति ज्वलति व्यजनेन वीज्यमानोऽपि ।
दहन इवानिर्वाणं न विमुञ्चत्युष्णतां पिशुनः ॥ १९ ॥
वक्रं विचरन्नहिरिव विहितजगत्प्राणचर्वणः पिशुनः ।
मुदितः क्वचिदुपलब्धे परकीयच्छिद्र एव निद्राति ॥ २० ॥
परिहृतमसाधुवाचा प्राचामाचारगोचरं वर्त्म ।
सज्जनसमाजसेवनमेव नरेभ्यो निवेदयति ॥ २१ ॥
मार्जितपरमालिन्यस्तप्तोऽपि मनागनन्तरं शिशिरः ।
जलमिव सुजनः स्नेहं विनिहितमभितः प्रसारयति ॥ २२ ॥
उपनीतनीतिनौकः संसारविकारवारिवन्यासु ।
सत्पुरुषकर्णधारस्तारयति बहूञ्जनानेकः ॥ २३ ॥
परहितहेतोर्विहिताः सुहृदः स्वहिताहितान्यजानन्तः ।
उपविन्यस्तपदानपि नौका इव तारयन्ति परान् ॥ २४ ॥

परिहृतपरापवादः परिमितवाक्परहितासक्तः ।
परिणतमतिपरिचर्यापरः पुरः सरति साधुचरितानाम् ॥ २५ ॥
प्राचां पथा प्रयाहादाचर संचारमन्यतो मा गाः ।
तत्रापवादपङ्के निपतति तं के नयन्तु बहिः ॥ २६ ॥
यद्यधिरजनि शयानः सद्मनि सुषमीहते सुमतिः ।
योषामिव परपुरुषापवादपरुषां गिरं त्यजतु ॥ २७ ॥
..... ।
निपुणं निगूढमेतच्चेतसि निर्व्यूढमाकलयेः ॥ २८ ॥
स्थालीव खलस्तापादुद्वमति रसेन पिहित····मन्तः ।
अन्तः कोटरगुप्तैः सहैव शाखीव दह्यते सुजनः ॥ २९ ॥
इदमस्खलितं धारय वारय परुषाक्षरा वाचः ।
एकः सकलजनानां जगति रिपुः परुषवाक्पुरुषः ॥ ३० ॥
परभृन्मौखर्यभिया पोषकमप्यात्मघोषमुत्सृजति ।
अतिमुखर एष सहते मुहुरपि दण्डाहतिं पटहः ॥ ३१ ॥
परमुखरत्वज्वलितः करोषि मौखर्यमेषोऽपि ।
पुनरपि तदेव कर्ता कः परिहर्तानवस्थितिं युवयोः ॥ ३२ ॥
सुखमुखमिति यदि न त्वं परिहरसि परापवादपारुष्यम् ।
द्विगुणितहेतुः स कथं तवापवादान्निवारयतु वाचम् ॥ ३३ ॥
परिहर चापलमुच्चैः पदसंस्थितिसुस्थिरे मनसि ।
चिरमेधते न चपलश्चपलैव निदर्शनं तत्र ॥ ३४ ॥
पुण्यानि सततमर्जय परिवर्जय पौरुषेषु वैमुख्यम् ।
पौरुषपुण्यविहीनः पुरुषो लोकद्वये हीनः ॥ ३५ ॥
परिचर मातरपितरावाचर नितरामभीप्सितामनयोः ।
संस्मृत्य जननजीवनलालनपरिपालनप्रणयम् ॥ ३६ ॥
परवित्तविमुखमन्तः परदारनिरीक्षणाक्षमं चक्षुः ।
हरिपरिचितस्य पुंसः परदूषणदूरवासिनी रसना ॥ ३७ ॥

न्यायोपनीतवित्तः परस्वपरिवर्जनप्रयतचित्तः ।
जीवति सुजीवनं तज्जीवनमरणं तदितरस्य ॥ ३८ ॥
यद्युच्चैरपि न परानुपकुरुषे तन्मृषैव ते जन्म ।
यदि नैष जनितवर्षः को नाम पयोधरोत्कर्षः ॥ ३९ ॥
निरुपधिपरोपकारः कोऽप्युच्चैःस्थायिनां भारः ।
जगदमृतैरभिषिञ्चन्नञ्चति केनाभिसंधिना चन्द्रः ॥ ४० ॥
उपकाराय न जातः सपदि सुजातः कुजातवैरेऽपि ।
ग्रासयति ग्रस्तोऽपि द्रोहिणममृतानि रोहिणीरमणः ॥ ४१ ॥
आचारमाचर चिरादालस्यमपास्य जात्युचितम् ।
लोकानुरागसाधनमाराधनमेतदेव हरेः ॥ ४२ ॥
अलमथ वा बहुवादैर्विरचय लोकानुरागनिर्बन्धम् ।
तत्रैकत्र समग्रं तन्निहितं यन्न जातु संनिहितम् ॥ ४३ ॥
उन्मदतया कयाचित्कदाचिदपथप्रवृत्तमपि पुरुषम् ।
सद्यः सुहृदुपदेशः सृणिरिव करिणं निवर्तयति ॥ ४४ ॥
दुष्टाः सुहृदुपदिष्टा द्विष्टा इव रोषरुक्षतां दधते ।
भेषजकारिणि पुरुषे परुषाः पशवः प्रकुप्यन्ति ॥ ४५ ॥

इति श्रीहरिहरसुभाषिते सुहृदुपदेशप्रकरणम् ॥ ३ ॥

धनमेव धरणिवलये कलयति सफलायुषं पुरुषम् ।
यदि जीवति धनरहितः कथय मृतः कीदृशो भवति ॥ १ ॥
अकपर्दकस्य विफलं जनुरिति जानीमहे महेशोऽपि ।
शिरसि कृतेन कपर्दी भवति जटाजूटकेनापि ॥ २ ॥
नीचस्याप्युत्कर्षो धनस्य नाम्नापि जायते जगति ।
वदति वराटकयोग्यं जलाशयं यत्सरोवरं लोकः ॥ ३ ॥
को नाम नानुवृत्तिं सुमहानपि धनवतः कुरुते ।
वित्तेशभवनभित्तेः समीपमुपसेवते शंभुः ॥ ४ ॥

अपि नित्यानन्दमयं महः श्रियं वहति संततं हृदये ।
कः साधारणपुरुषः प्रभवत्वेनामनादर्तुम् ॥ ५ ॥
दौर्गत्यकलुषितानां दूषणतामेव गच्छति गुणोऽपि ।
बिभ्राणो गुणमभजद्विषधरवत्तां दिगम्बरो देवः ॥ ६ ॥
धनवानपि गुणवानप्यभिजनवानप्यपौरुषः पुरुषः ।
शृङ्गारितमिव चित्रं न भवति पात्रं दयादरयोः ॥ ७ ॥
पौरुषविमुखः पुरुषः परहितपरुषश्च पौरुषमयोऽपि ।
अपि कृतपरोपकारः स्वकृतश्लाघी च लाघवं भजते ॥ ८ ॥
शोभामुपैति पुरुषः स्वजातिसदृशेन पौरुषवशेन ।
न ब्राह्मणस्य बडिशं सदृशं न च धीवरेऽधीतम् ॥ ९ ॥
न क्षत्रिय इव योद्धा न वैश्यवत्कर्षणादिसंपन्नः ।
विप्रः प्राप्नोति परं चिरं यशः प्रार्थनकृतार्थः ॥ १० ॥
निवसन्निजेऽपि भवने प्रभवति भरणाय यदपि भृत्यानाम् ।
तदपि न गुणवान्पुरुषः प्रवासविमुखः परादरं लभते ॥ ११ ॥
शयनाशनादिविधुरो भवति विदेशेषु चङ्क्रमक्लेशः ।
निर्धनभवननिवासप्रयासखेदस्य षोडशो भागः ॥ १२ ॥
किं जीवति यच्छायामुपजीवति बन्धुवर्गस्य ।
तरुविटपप्रच्छन्ने प्रक्षिप तापक्षुपे नयनम् ॥ १३ ॥
परदेशे पर्यटतो यापनमपि जन्मनः श्रेयः ।
कृतमुपचितस्य बन्धोर्मुखावलोकात्सुधावगमैः ॥ १४ ॥
तावज्जीवति जन्तुर्यावद्भुङ्क्ते स्वयं समाहृत्य ।
पिण्डं परप्रयुक्तं प्राप्य प्रीणाति परिहृतप्राणः ॥ १५ ॥
न्यक्कारमुदरभरणे लब्ध्वा राहुर्जहावुदरमेव ।
उचितं केतुरहासीदमृतेऽपि कृतार्थनामुदनम् ॥ १६ ॥
इच्छति मानी मरणं न च गच्छति वैरिणः शरणम् ।
मानक्षरणं मरणं मानप्राणस्य केवलं कृतिनः ॥ १७ ॥

अपि जलकणान्पयोधेर्दूरादाहृत्य जायते जलदः ।
निकटाद्घटानपि शतं समाहरन्वारिहार्येव ॥ १८ ॥
तत्तद्देशाचारश्रुतवेषवचोविशेषवैदग्ध्यम् ।
विदुषामिदं विभूषारत्नमयत्नादुपैति परदेशे ॥ १९ ॥
भ्रमतामुदेति जगतो वैचित्र्यविलोकनेन विज्ञानम् ।
यादृच्छिकानि पुण्यान्यनेकतीर्थाभिषेकजनितानि ॥ २० ॥
कलिकलुषसंकटाकुलकुटुम्बसंवलनखेदविकलस्य ।
प्रतिनिधिरिव प्रवासः संसारविरागमुखमुदस्य ॥ २१ ॥
योषिदजनितापत्या नित्यापरिभूतवैरिणः क्षितिपाः ।
गुणिनो विदेशविमुखा न सुखाय भवन्ति बन्धूनाम् ॥ २२ ॥
नानानरपतिपरिषत्परिगणितगुणो जनो जगति ।
यज्जीवति तज्जीवितमितरत्किं तन्न जानीमः ॥ २३ ॥
यदपि प्रवासगमनं जीवितसंदेहदोलिकारोहः ।
तदपि तदेव श्रेयो जीवनमरणादनुद्यमहतस्य ॥ २४ ॥
प्रवसन्त्वनलसमनसः परानुरागोन्मुखाः पुरुषाः ।
अलमलसैर्जनविसरैश्चिरमपि परदेशदर्शिभिः पशुभिः ॥ २५ ॥
शीतातपवर्षाणामुत्कर्षान्संभवे समपहाय ।
प्रवसेदसंभवेऽपि प्रावृषि न प्रोषितो भूयात् ॥ २६ ॥
कः प्रेत इति प्रश्ने सदुत्तरे प्रान्तभक्षकं रक्षः ।
प्रादाद्धनमतिहर्षात्प्रेतं वर्षाध्वगं [व]दते ॥ २७ ॥
सद्वासरे सुलग्ने प्रमोदमाने च मङ्गलैर्मनसि ।
गरुडारूढस्य हरेः स्मरेत्प्रयातः पदाम्बुरुहम् ॥ २८ ॥
सति संभवे सहायैः प्रसरति बहुदेशदर्शिभिर्बहुभिः ।
ग्रामाद्ग्रामान्तरमपि जातु सचेताः प्रयाति नैकाकी ॥ २९ ॥
विपदं प्रतिपदसुलभां कः प्रतिकुर्याद्विना सहायेन ।
एकाकिनो जगदिदं जनमयमपि निर्जनारण्यम् ॥ ३० ॥

श्वेवायात्याहूतः शर इव संयात्यनुप्रहितः ।
मन इव हितनिहितात्मा सुकृतशतैः सेवको भवति ॥ ३१ ॥
शठमतिरलसप्रकृतिः प्राज्ञंमन्यश्च लोलुपश्चपलः ।
अभिमानवान्निदेशाक्षेप्ता सप्तापि सेवका विपदः ॥ ३२ ॥
यानाशनशयनासनवेशाद्युपयोगिवस्तुविस्तारैः ।
सुखिनः प्रवसन्ति नराः प्रवसति कश्चित्कमण्डलुकरोऽपि ॥ ३३ ॥
कौपीनवानपि गतः श्रिया वृतः सम्यगेति सत्पुरुषः ।
श्रीमानपि प्रयातः कापुरुषः पुनरुपैति कौपीनी ॥ ३४ ॥
सति संभवे शयानः सुविदितगन्तव्यवर्त्मसंस्थानः ।
अनुचरजनहितकारी वन्याहारी भवेत्पथिकः ॥ ३५ ॥
तत्तत्पथपथिकक्रमसमुचितसंचारवासविश्रामः ।
पथि संचरेदवहितः परिचयरहितेषु येषु तेष्वेव ॥ ३६ ॥
नापरिशीलितशीले सद्मन्यपि विश्वसन्ति विद्वांसः ।
परदेशेषु कराले कलिकाले कस्य विश्वासः ॥ ३७ ॥
शनकैः संतीर्णपथः पुरोपकण्ठे धरापतेर्धीरः ।
विश्रम्य विदितवासप्रदेशमस्मिन्प्रवेशमाचरति ॥ ३८ ॥
पुरतः पुरमपरिचितं न नीचवेशा विशन्ति विद्वांसः ।
प्रथमेक्षितामवस्थां यस्मात्सर्वे स्मरन्ति सर्वस्य ॥ ३९ ॥
नगरे नरेश्वरस्य प्रविश्य पुरतो विचीयते वसतिः ।
आरामदेवमन्दिरवापीकूपादिरम्यविजनेषु ॥ ४० ॥
नाचरति दूरदर्शी परदेशी पौरविपरीतम् ।
नापरिचितस्य सहते तनुतरमपि वैकृतं लोकः ॥ ४१ ॥
पुरतः परनगरगतः परिचयमासाद्य साधुलोकेन ।
निभृतेन भवति निपुणः सदसन्नृपभृत्यवृत्तविज्ञाने ॥ ४२ ॥
सुविदितसकलविशेषः समुज्ज्वलैरनुचरैरनुचितवेषः ।
अभिगत्य पश्यति पुरः पुरस्कृतं नरपतेर्धीरः ॥ ४३ ॥

निजदेशकुलाख्यानामाख्यानादनुगुणान्विमर्षी ।
ज्ञापयति नृपतिदयितं सुभाषितैराहरन्हृदयमस्य ॥ ४४ ॥
सदवसरे सप्रणयः प्रागेव निवेदितः प्रभवे ।
नीतो नरपतिपरिषत्पुरस्कृतेनोपसर्पति नरेन्द्रम् ॥ ४५ ॥
गुणजातिसमयसदसामनुरूपेणोज्ज्वलेन वेशेन ।
करचरणवदनचिकुरादिभिरुज्ज्वलितैरुपैति नरपालम् ॥ ४६ ॥
गुरुणा गुणानुबन्धाल्लघुरपि नीतो निमज्जनमुपैति ।
उपलनिबद्धालाबूनिचय इवान्तर्जडस्यापि ॥ ४७ ॥
परिषदमपरिचितां च प्रविश्य धैर्यापवर्जितातङ्कः ।
आशीःपद्यविशेषं [वि]चिन्तयन्वीक्षते क्षितिपम् ॥ ४८ ॥
सुललितकलादिवलिताञ्जलिरुपयातो नृपासनसमीपम् ।
विनयगुणावनतवपुर्विकाशिमुखमाशिषं ब्रूते ॥ ४९ ॥
आमेरुमलयमूर्वीवलयमलंकृत्य कीर्तिकर्पूरैः ।
मङ्गलमाप्नुहि नित्यं गुणमय जय जीव यावदादित्यम् ॥ ५० ॥
उपविशति नृपनियुक्तः केनचिदन्येन वा जनेनोक्तः ।
निजवेशजातिसमुचितमासनमालोक्य सेवते सुमतिः ॥ ५१ ॥
परिषज्जनोपवेशनविन्यासविशेषसदृशमुपविष्टः ।
सति संभवे समीपं संमुखमपि सेवते नृपतेः ॥ ५२ ॥
क्षणमपसारितसाध्वसमुपविश्य सतां विलोक्य वदनानि ।
परतः स्वतोऽपि वा स्वं वचनावसरं प्रवर्तयति धीरः ॥ ५३ ॥
आवर्जित इव विनयादीषन्मधुरस्मिताननसरोजः ।
अङ्गार्पितकरयुगलः कलयति विज्ञप्तिमीक्षतो नृपतेः ॥ ५४ ॥
जीवतु चिरं नरेन्द्रः किंचिदुपन्यस्तुमस्ति मे वाञ्छा ।
इत्यादिवागुपक्रमकुशलोऽवसरे सुभाषितं ब्रूते ॥ ५५ ॥
निःसाध्वसमतिमधुरं स्पष्टाक्षरमुन्नतग्रीवम् ।
बहुधाव्यवहितसमयानुचिन्तितं पाठ्यमाशिषां पद्यम् ॥ ५६ ॥

वर्ण्यो बलिरिव दाने सुरगुरुरिव विश्वविज्ञाने ।
अमरेश्वर इव समरे स्मर इव शोभासु भूपालः ॥ ५७ ॥

इति श्रीहरिहरसुभाषिते प्रवासप्रकरणम् ॥ ४ ॥

देव त्वन्नेत्रपाथोरुहसहचरणादस्तु पद्मा सपद्मा
वाग्देवी सत्कवीनां विशदयतु यशो वीर युष्मद्यशोभिः ।
सन्तु द्वीपास्त्वदोजःप्रतिनवतपनैरेव संतापितप्ता
भूयात्तद्वैरिनारीनयनमृगमयी भूधरारण्यभूमिः ॥ १ ॥
साम्भोदर्भतिले भवत्करतले मेरौ भयोत्कम्पिनि
ब्रूमः किं वयमेव देव भवतो भव्याय दिव्याशिषः ।
प्राप्य प्रार्थनयाप्यलभ्यमसकृत्त्रस्यत्प्रियालिङ्गनं
स्वर्गेऽप्युत्पुलकाङ्कुरैस्त्वयि सुरैराशीःपरैर्भूयते ॥ २ ॥
भूमीपाल भवत्कृपालव इवोपासन्नकल्पद्रुमः
श्रीमत्सैन्यवदन्यजित्वरपुरोद्दाहस्फुरत्साहसः ।
युष्मद्वैरिवदुज्जटो गतपटो भिक्षावशस्त्वद्यशः-
कर्पूराचलवत्सितस्तव हितः कोऽप्यस्तु लोकस्तुतः ॥ ३ ॥
गङ्गोत्सङ्गवलन्मृणालशकलप्रत्याशयोद्यत्करं
भोक्तुं मुग्धहृदि क्षपाकरकलां लम्बोदरे धावति ।
सद्यस्त्वद्यशसि स्वयं गिरिभुवा गीते पुरः प्रोच्छल-
त्तद्भावल्यतिरोहिते हिमकरे हृष्टो हरस्तायताम् ॥ ४ ॥
भुज एव तव क्षितेर्निवासस्त्वदपाङ्गे कमलालयाविलासः ।
सुखलब्धवधूद्वयीसमाजस्तव चित्ते हरिरस्तु भक्तिभाजः ॥ ५ ॥
यौष्माकीणयशोनिशाकरशते नित्योदिते मुद्रिते
नाभीपल्वलपङ्कजे मुरारिपोरन्तर्गते ब्रह्मणि ।
निःप्रत्यूहमहन्यपि च्युतचिरव्रीडाभरं भूयते
भूयादब्धिभुवो रतोत्सवरसव्यासङ्गलग्नं मनः ॥ ६ ॥

चैत्रीचन्द्राभचन्द्रातपतलचकितोच्चित्तचञ्चच्चमूरु-
प्रोदञ्चल्लोचनानां चतुरकरचलच्चामरोच्चारचेलः ।
न्यञ्चच्चामीकरार्चारुचिरुचिरमुखस्त्वं चिरं चारुकीर्ते-
र्वीचीनां चाकचिक्यं चतुरुदधिचराश्चारयोच्चैश्चकोरान् ॥ ७ ॥

निर्णीय त्वत्प्रतापज्वलनसमुदयं किं द्रवीभावभीत्या
ब्रह्मा ब्रह्माण्डमेतत्कनकमयमधाद्वीरवारिण्यपारे ।
अस्याप्यन्तस्थनागावलिमनवरतान्निर्झरान्निम्नगानां
लक्षं सप्ताम्बुराशीन्यधित निरवधीनुन्मदानम्बुवाहान् ॥ ८ ॥

त्वदरिपुरपुरंध्रिभिः प्रतापज्वलनमुपेतमुदीक्ष्य तावकीनम् ।
कति कति न समन्ततः क्रियन्ते प्रतिभवनं नयनाम्बुभिस्तटिन्यः ॥ ९ ॥

नित्याक्षीणकले निरङ्कधवले युष्मद्यशोमण्डले
व्योमारोहिणि रोहिणीपतिरतिव्यर्थोऽभवद्भूपते ।
एतस्य प्रतिकारमेष महतो वैरस्य वीराचर-
न्वीक्ष्य त्वां मुदिताः पुरेषु वनिताः संतापयन्भ्राम्यति ॥ १० ॥

त्वत्कीर्त्योपनतं न किंनरपतेऽरण्यस्थितौ वैरिणां
यद्वासांसि मलीमसानि धवलस्फीतन्त्यधौतान्यपि ।
ज्योत्स्नन्त्याशु तमांसि चन्दनरसक्षोदन्ति पङ्कच्छटा
मृद्भाण्डान्यपि राजतन्ति परितः सौधन्त्यरण्यान्यपि ॥ ११ ॥

यैर्युष्मत्करवालकालदशनोत्कृत्तैरिहैकक्षणे
कीर्णा भूमिरियं भयंकरतरैरेतैरुपेतैर्दिवम् ।
नीरन्ध्रं परिपूरितामुपचितो रथ्यासु मिथ्याभय-
व्यग्रैः स्वर्गिभिरर्गलाकुलगृहद्वाःस्थैरवस्थीयते ॥ १२ ॥

त्वदसिदलितदेहैरेकदैवोत्पतद्भि-
र्व्यरचि विधुरवर्गैश्चालनीचण्डरोचिः ।
अहमहमिकयास्मिन्दिग्वधूभिर्विधूते
धरणिरजनिपुष्टा कीर्तिपिष्टातकैस्ते ॥ १३ ॥

नरेन्द्र मन्ये निगदन्तु देवं मया दयादक्षिणदृष्टमेव ।
द्विपायिते दीनपयःपयोधेः पृथ्वीतले कल्पतरोः प्रवाहः ॥ १४ ॥
संनिविश्य मनसा क्षितिप त्वां सैन्धवेषु समशोधि विरोधः ।
येन ते चिरदरिद्रकुलेषु ग्रामवासविकलेषु पतन्ति ॥ १५ ॥
इह तव देव निपतता करकमलकुशोदके [तु] जायन्ते ।
तत्तद्दूरदरिद्रद्वारि द्विपदानवारिभिः सरितः ॥ १६ ॥
प्राप्तास्त्रासात्पिपासातिशयमुपगताः पातुमारण्यमम्भो
युष्मद्विद्वेषियोषाः श्वसितसमुदयैस्तत्तदीयैरशोषि ।
एतत्संवीक्ष्य मूर्छानिपततनवो नैव जीवेयुरेता-
श्चेन्नोपेताः शबर्यो निजनयनजलैः पल्वलं पूरयेयुः ॥ १७ ॥
वीर त्वद्वैरिदारा गहनगिरिमहागह्वरान्तस्थमित्रं
त्वत्त्रासाद्गुप्तवासा दवकलितहृदो यद्यदेव प्रपन्नाः ।
तत्तज्ज्योत्स्नायमानं धरणिपरिवृढ प्रेक्ष्य युष्मद्यशोभिः
सद्यो मोहान्धकारानुसरणशरणा वासरान्वाहयन्ति ॥ १८ ॥
भृङ्गारेण महीमयेन करकं क्षौमेण वल्काम्बरं
पट्टीयप्रकरेण बर्हनिवहं हारेण गुञ्जावलीम् ।
इत्थं प्रार्थनया कया न भवतो वैरिस्त्रियो वस्तुभिः
क्रीडन्त्यात्मविनिह्नवाय चकितं चिह्नान्यरण्यस्त्रियाम् ॥ १९ ॥
निभृतमुषितैर्योषिद्वृन्दैर्वनान्तलतान्तरे
प्रतिदलततिच्छिद्रे च्छिद्रेऽर्पितेषु भियाक्षिषु ।
शिव शिव मृगीयूथभ्रान्त्या समीपमुपागता-
न्दधति हरिणान्हस्तैर्जीवातवे तव शत्रवः ॥ २० ॥
गान्धारा गुप्तदारास्त्वयि चलति गलद्बाष्पधाराविहारा
गाढास्त्रासावगाढा क्षितिपकुलमणे गुर्जरा जर्जराशाः ।
तैलङ्गास्त्यक्तशङ्कास्त्रिभुवनतिलक क्लिश्यदङ्गाः कलिङ्गा
मोरङ्गा मुक्तरङ्गाः सपदि समभवन्वीररङ्गा विहङ्गाः ॥ २१ ॥

वीराणामेष गन्ता नगरमयमरीन्संमुखानेव हन्ता
सद्यो भेद्यं ततस्तैर्बत रुचिरमिदं मण्डलं चण्डभासः ।
मत्वैतन्मेदिनीयं प्रतरुणकरुणोत्कम्पिता त्वत्प्रयाणे
सेनाधूलीवितानाञ्चलतलविवलद्बिम्बमेनं विधत्ते ॥ २२ ॥

त्वत्सैन्ये धरणीमणे प्रचलति प्रोत्पीतमर्मान्तरे
कूर्मे द्राक्परिवर्तिनि क्षितितले व्यावर्तमाने ततः ।
वार्धेर्वारिभवे बहिर्विचलिते मैनाकपक्षक्षतिः
किं न स्यात्स न चेद्भवेद्विकलदृग्धूलीभरैर्वासरः ॥ २३ ॥

यौष्माकीणे प्रयाणे प्रचलजलनिधिप्रोच्छलद्वारिपूर-
स्नातैर्नालम्भि तोयप्लुतधरणिगतैर्धूलिरुद्धूलनाय ।
सेनारिङ्गत्तुरङ्गावलिवलितखुरोद्धूतधूलीवितान-
व्याप्ताङ्गैर्निष्प्रयत्नं स्थितमतिसुखितैर्दिग्गजग्रामणीभिः ॥ २४ ॥

भूमीपाल कृपालवस्तव हया द्राग्दीर्णताया भया-
दुल्लङ्घ्यैव गिरीनटन्त्यघटितैष्टापानलैश्चञ्चलैः ।
क्षुद्रा क्षोणिरियं स्फुरत्खुरपुटक्षु[ण्णा]क्षणान्मास्त्वितो
धावन्त्यम्बरमेव चत्वरमनुप्राप्यान्तराप्यायिताः ॥ २५ ॥

इन्द्रो निन्दति वाहमाह दिनकृद्दुर्वा च मे वार्वत-
श्चञ्चुर्य्यञ्चति किं न पन्नगरिपोरन्तस्त्वपोद्रेकतः ।
वातः खञ्जति पङ्गुपुञ्जति मनोराजिर्भवद्वाजिषु
द्वेषामाजिषु वैरिणामभिमुखं धावत्सु यावत्सुखम् ॥ २६ ॥

यान्तु क्वामी समीराः क्षणमपि च मनः कुत्र न स्पृष्टपृष्ठं
तिष्ठन्त्वेते सहस्रं समपथि गिरयः को वयस्यापकर्षः ।
किं नश्छिन्नं प्रतेयुर्यदि जलनिधयः सर्वतः संनिकर्षा-
न्ह्रेषाहर्षान्नृपैतत्त्वयि जिगमिषति व्याहरत्येव वाहः ॥ २७ ॥

समुद्रावधिक्षुद्रभावान्दधाना कुतो भूर्यतोऽभीष्टवेगो विनष्टः ।
हयैर्मन्युनेवामुना हन्यते किं धरा निर्भराहंकृतैः पद्भिरेव ॥ २८ ॥

दृष्टोदञ्चत्कुथान्तान्धरणिप करिणो धावकस्तावकीना-
न्किं भूयो जातपक्षाः क्षितिवलयमिदं क्ष्माभृतः क्षोभयन्ति ।
इत्युद्भ्रान्ताः प्रधावेदमरपरिवृढः स्यान्न सद्यः शची चे-
द्भेरीभाङ्कारघूर्णत्कनकगिरिशिरःस्थायिनी स्थापनीया ॥ २९ ॥

शृङ्गैनैकेन हेम्नः कथमयमभवन्मेरुरग्र्यो गिरीणा-
मित्येतं जेतुमेतस्तुहिनगिरिरसौ श्रीमतः सौधभावम् ।
आकीर्णः स्वर्गशृङ्गैः सुललितकलशव्याजतो जायमानै-
र्युष्मत्सेवानुरूपं विभवमलभत क्काफलस्त्वत्प्रसादः ॥ ३० ॥

प्राप्ता वासकसज्जतां प्रथमतस्त्वां यु(यो)द्धुमुत्कण्ठिता
योधास्तेऽभिमृता मनागरिचमूः स्वाधीननाशस्थिता ।
भीत्या प्रोषितभर्तृका समभवत्त्वत्सायकैः खण्डिता
दूरादन्तरिता विधाय कलहं हा विप्रलब्धा विधेः ॥ ३१ ॥

शृङ्गारस्त्वमसि क्षितावरिबले वीरः परेषां पुरे
रौद्रो दीनहृदामुदारकरुणस्तैस्तैर्गुणैरद्भुतः ।
हास्यो नित्यमदातुरङ्गदलने बीभत्स एव द्विषां
दुर्वृत्तस्य भयानको नवरसः शान्तोऽर्थिसंतोषणे ॥ ३२ ॥

प्रामाण्यं परतः स्वतोऽपि भवतो विज्ञायते सन्मते
भूमीन्दो भवता क्षणस्थिरतया वर्णाश्चिरं स्थापिताः ।
सर्वज्ञैकसदीश्वरोऽपि न परं ब्रूते भवानीश्वरं
तन्नैयायिकनायकस्य भवतो मीमांसकत्वं कुतः ॥ ३३ ॥

स्वतः प्रकाशो मनसो महत्वं धर्मेषु शक्तिश्च तथान्यथा धीः ।
भूपालगोपालपदैकभक्तेरन्यैव नैयायिकता तवेयम् ॥ ३४ ॥

शक्तिः प्रमापयति वीर तवोपमानं
प्रामाण्यमाप्तवचनेषु परैव जातिः ।
जातौ गुणागुणगणाश्रयिणो विशेषा
वैशेषिकं किमपि दर्शनमद्भुतं ते ॥ ३५ ॥

त्वद्बाणेषु यमो जयेषु नियमो याने स्थिरं चासनं
श्रान्तौ श्वासविनिग्रहो गुणगणे प्रत्याहृतिः श्रीमतः ।
ध्यानं शूलिनि धारणा च धरणौ धर्मे समाधिर्यत-
स्तन्निर्विण्णहृदः किमीश्वरपरे ध्यायन्ति पातञ्जले ॥ ३६ ॥
एकं वस्तु यदस्ति नित्यनिबिडानन्दप्रबोधात्मकं
सत्यं तत्त्वमसीति वाक्यमखिलं त्वय्येव विश्राम्यति ।
त्वामाकर्ण्य न किंचिदन्यदवनीशृङ्गारमन्मन्यते
त्वय्यास्ते जनकादिकीर्तिजनके किं ज्ञानमीमांसया ॥ ३७ ॥
गुणास्ते निःक्षोभाः प्रकृतिरियमाधत्त भवतो
महत्तत्त्वं तच्चाप्यजनयदहंकारमुचितम् ।
कृतं तेनाप्युर्वीरमण गुणमात्रार्जनमितः
स्फुरत्कर्मज्ञानेन्द्रियसचिवसूर्यादिकमभूत् ॥ ३८ ॥

इति श्रीहरिहरसुभाषिते राजप्रशस्तिप्रकरणम् ॥ ५ ॥

स्वस्याथ वा परस्य द्वित्राणि मनोहराणि पद्यानि ।
आख्याय व्याख्येयान्यव्यग्रं मधुरमग्रतो नृपतेः ॥ १ ॥
विद्वानयमितरो वेत्याख्यानव्याख्ययोरेव ।
प्रायः प्रथमे पद्ये परीक्ष्यते परिषदा पुरुषः ॥ २ ॥
पद्यप्रसङ्गसंगतमथान्यथा वापि किंचिदवतार्य ।
स्वाधीतदर्शनोक्तं युक्तं विद्वानुपन्यसति वस्तु ॥ ३ ॥
यावद्वचनावसरं ब्रूते मधुरं निराकुलं सदसि ।
पश्यन्नरपतिसदनं तिष्ठति तदनन्तरं धीरः ॥ ४ ॥
नासंततमभिदध्यादध्यास्य सदः प्रभुत्वमत्त्वस्य ।
यावन्नरपतिरुचितं वक्तुमपर्याप्तमप्युचितम् ॥ ५ ॥
पृष्टे ब्रवीति हृष्टे हर्षमुपायात्यवादिते मौनी ।
नृपसदसि नोचितामप्यसंमतो वाचमुद्गिरति धीरः ॥ ६ ॥

उत्थाने सभ्यानामुत्तिष्ठति याति तेषु यातेषु ।
मतमन्तरापि राज्ञो विज्ञायाशीःप्रदो बहिरुपैति ॥ ७ ॥
प्रत्यहमेवमुपास्ते सदवसरे संमतो नृपतेः ।
नाज्ञातनृपतिसंमतिरुपसर्पति संनिधिस्तस्य ॥ ८ ॥
नानवसरे नरेशं सुखयति पुरुषः प्रियोऽपि समुपास्य ।
दिवसे न शीतधामा तामादरणीयतां लभते ॥ ९ ॥
मङ्गलनिलयो भूयाश्चिरमवनीं पालयञ्जीयाः ।
जय भूमिचक्रशक्र स्वस्तीत्याद्याशिषः पुरो वाच्याः ॥ १० ॥
राजाशिषोऽवसाने द्वित्रा नरपालपूजिताः सुधिया ।
नत्याशीर्भ्यो सभ्या·····यथोचितेन परितोष्याः ॥ ११ ॥
नोच्चैर्न चातिनीचैर्न सभामध्ये न हीनसंबन्धे ।
न नृपासनास्रवस्रस्पर्शेऽपि वसन्ति विद्वांसः ॥ १२ ॥
अत्युच्चैरतिनीचैरश्लीलमनुक्तमनुपयुक्तं च ।
न वदति नृपतिसभायामादरमीप्सुर्महामनसाम् ॥ १३ ॥
नृपसचिवसंकथायां संगतमपि नाभ्युपेत्य वक्तव्यम् ।
अनधिकृतिभाषितायां वाचि विचित्ता भवन्ति धनमत्ताः ॥ १४ ॥
अनुरञ्जय राजानं मा जानञ्जातु कोपय प्रकृतीन् ।
एतद्वयानुरागस्थिरया तिष्ठ प्रतिष्ठयाश्लिष्टः ॥ १५ ॥
गुणवसनभूषणाद्यैर्लभतामलमादरं नृपतेः ।
प्राप्नोति प्रियवेदी नेदीयानवसरे सुसौभाग्यम् ॥ १६ ॥
बहुवाक्यैरविरुद्धो बद्धस्पर्धो जनेन हीनेन ।
स्वमुखेन याचमानः स्वगुणश्लाघी च लाघवं भजते ॥ १७ ॥
उल्लङ्घ्य सरिदरण्यग्रामगिरीन्कामकातरा यान्तु ।
अभिसारिण्य इवान्तस्तृष्णां निगदन्ति न स्वयं सुधियः ॥ १८ ॥
वेशः स एव सगुणः स द्रविणोपार्जनोपायः ।
यत्र स्ववंशविद्यासदृशी न विशीर्यते कीर्तिः ॥ १९ ॥

अभिलषति न खलु पुरुषः श्रियमपि कीर्त्या विना कृतां कुशलः ।
क्षणिकाय वस्तुने कस्त्यजतीह चिरस्थिरं श्रेयः ॥ २० ॥
राजा न जातु मित्रं सेवामेवाचरद्भिरपि वेद्यः ।
आजन्मलालितेन द्विजो रजोऽन्धेन भोगिना दष्टः ॥ २१ ॥
लघुरिति न भूमिपालो बालोऽप्यालोक्यते विदुषा ।
भसिताचितेऽप्युदीते दहनकणे सा हि दाहिका शक्तिः ॥ २२ ॥
कृतमन्त्रिमनःक्काथो लक्ष्मीनाथोऽपि नरपतेर्दयितः ।
कण्ठे कठिनकुठारप्रहारतः प्रापितो मरणम् ॥ २३ ॥
उचितामुपास्य रुचितामभिधेहि गिरं निरन्तरावहितः ।
अप्यायतिमतिपुरुषे प्रभुणा कलुषेण भूयते कथिते ॥ २४ ॥
अन्धा इव बधिरा इव मूका इव मोहभाज इव ।
पङ्गव इवानभिमते नृपतेर्निवसन्ति साधवः सदसि ॥ २५ ॥
तालज्ञा इव तरला यथा यथा नर्तयन्ति धनमत्ताः ।
नृत्यन्त्यपरिस्खलितास्तथा तथैवार्थिनः कृपणाः ॥ २६ ॥
आशापाशनिबद्धो नृत्यति किं वा नरो न धनिकपुरः ।
हतशैलूषस्य विधेः कुत्र विधेयः सुखमुपैति ॥ २७ ॥
अलमात्मीयं विदितं विदितं धनिकस्य याचको रहितः ।
चन्द्रं ब्रवीति चटकं चटकं चन्द्रं च लोभलोलमनाः ॥ २८ ॥
अमृतायतामिति वदेत्पीते भुक्ते श्रुते शतं जीव ।
छोटिकया सह जृम्भासमये स्यातां चिरायुरानन्दौ ॥ २९ ॥
अल्पेऽपि नृपतिदत्ते प्रतिश्रुते वापि दातुमेतेन ।
उत्थायाशीर्देया क्वचिदुपविश्यापि परिषदौचित्याः ॥ ३० ॥
यदि नामासंगतमपि संगमयितुमस्ति कौशलं वचसि ।
प्रस्तावे स्तुतिमाचर सुखहरणीयोऽनयैव नरपालः ॥ ३१ ॥
किं सम्यगिति प्रश्ने भीतः स्तोत्रं श्रियः पतिः प्राह ।
स्तव्यस्तेन श्रीमान्कस्य न वा वल्लभा स्तुतिर्भवति ॥ ३२ ॥

संकथनमप्यनर्हं पश्यति नृपतौ परेण केनापि ।
स्तुत्याशीःस्तुत्यादेः का वान्यस्मिन्कथापि तत्पुरतः ॥ ३३ ॥
राजनि पराग····ग्रन्थिं श्लथयन्ति संततं पिशुनाः ।
एषामिहावकाशो रेखासदृशोऽपि वर्ज्यते विदुषा ॥ ३४ ॥
क्षुद्रोपद्रवभीत्या न त्याज्या राजपरिषदः पुरुषैः ।
कण्टकभेदादिभिया सुधिया केनापि मुच्यते देहः ॥ ३५ ॥
कुलशीलपौरुषादि प्रख्यातयशोविशोभिजन्मानम् ।
धनवन्तमधनमपि वा रञ्जय राजानमुन्नतारम्भम् ॥ ३६ ॥
नीचसचिवसंघृष्टं धनसंचयलुब्धमल्पसंतुष्टम् ।
धर्मपथादपरक्तं वृथा विधायापि नृपतिमनुरक्तम् ॥ ३७ ॥
यद्यपि गुणसमवहितो विहितोचितपौरुषप्रणयः ।
क्षुद्रक्षितिपसभायामाचारणया समुपविश्य ॥ ३८ ॥
त्यागी वरमल्पधनः कुबेरकल्पेन किं कदर्येण ।
उदधेरलभ्यपयसः सुलभजलं पल्वलं श्रेयः ॥ ३९ ॥
अलमथ कथनसहस्रैर्नरपतिगुणदोषतारतम्यस्य ।
द्रविणार्पणे समर्थः सेव्यो राजेति परमार्थः ॥ ४० ॥
शास्त्रार्थव्याख्यानैर्धर्मकथाभिर्नयाख्यानैः ।
ललिताभिः कविताभिः प्रसङ्गतः प्रीणयेन्नृपतिम् ॥ ४१ ॥

इति श्रीहरिहरसुभाषिते राजोपासनप्रकरणम् ॥ ६ ॥

विज्ञाय नीतिमन्तं श्रीमन्तं सेवते सुमतिः ।
अनयप्रणयिनि राजनि नाजनि कुत्रापि कल्याणम् ॥ १ ॥
अत्युपचितैरुपायैश्चक्रभृदेको भुजैरिव चतुर्भिः ।
नृपतिः श्रियमतिसुचिरं हरिरिव परिरभ्य निर्भरं रमते ॥ २ ॥
साम समे सुमतीनामधिके दानं रिपावुचितम् ।
भेदः सर्वत्र हितो विहितो विजयाय विग्रहः कृतिनः ॥ ३ ॥

समकक्षे प्रतिपक्षे साम्ना सुखमेधते सुमतिः ।
अन्यत्र सामकामः पश्चात्परितप्यते नृपतिः ॥ ४ ॥
साम्नान्वितोऽपि बलवाञ्जलमिव वह्निं विनाशयत्येव ।
तस्माद्बलवति सामध्यानमलं मन्यते सुमतिः ॥ ५ ॥
वदतोऽपि प्रियवचनं रुदतोऽपि हि कण्ठमाश्लिष्य ।
शपतोऽपि दैवतशतैर्न भवति विद्वान्वशे द्विषतः ॥ ६ ॥
रणपतितस्य मुखान्मे शृणोतु भूयो रिपोर्धनं गुप्तम् ।
इत्याहूय समीपं हतो हतेनापि हतनृपीयेन ॥ ७ ॥
अतिबलिनामपि मलिनाशयेन विश्वंभरादीनाम् ।
विश्वासोपनतानां वासोपुत्रेण जीवितं जह्रे ॥ ८ ॥
अपरीक्षितपरवञ्चनमञ्चति लोभादवेक्षितप्रेक्षी ।
व्याधूतपक्षमवशो विहन्यते पक्षिवत्क्षितिपः ॥ ९ ॥
क्रूरचरितेन संगतमसंगतं सत्त्वभावस्य ।
जीवति पटीरविटपी परिरभ्य न पावकं प्रायः ॥ १० ॥
निहतं गीतेन मृगं मीनं बडिशेन तेजसा शलभम् ।
दृष्ट्वापि यदि न पश्यति नश्यति किं केन करणीयम् ॥ ११ ॥
कामं कुमीनसदृशं राज्यमपि प्राज्यकण्टकं कुशलः ।
पाकान्वितमतिसुरसं भुङ्क्ते बहुधावधानेन ॥ १२ ॥
अतिबलवति मतिशाली सदसि नृपाली नमस्कृते नृपतौ ।
दानविधिं विदधानो गताभिमानोऽतिवाहयेत्समयम् ॥ १३ ॥
अर्थेन रक्षितमिदं राज्यं पुनरर्थमर्पयति ।
अर्थैकपरो नृपतिः परिहरति पुनः क्षणादुभयम् ॥ १४ ॥
अप्यतिशयितमनर्थं समयत्यर्थं समर्पयन्नृपतिः ।
तदनर्पयन्निरर्थं प्राणेन समं परित्यजत्यर्थम् ॥ १५ ॥
उत्तारयति विपत्तावतिधनमत्तामपक्षते क्षितिपः ।
चेन्नेह तदुपयोगस्तन्नियतं वित्तसंचयो रोगः ॥ १६ ॥

रविरिव सुचिरेण रसं भृशं नृपो धनमुपादत्ते ।
काले वर्षति हर्षान्निस्पृहमुच्चेऽपि नीचेऽपि ॥ १७ ॥
दानं राज्यनिदानं प्रबले स्वबले च दुर्बले नृपतेः ।
फलमत्र कालहरणं सहप्रहरणं च पापसंहरणम् ॥ १८ ॥
वृत्तिभिरनिवृत्तमुखा यस्य नृपस्योपजीविनः पुरुषाः ।
स हि समिति विजयमयते शेते सह वा सहस्रेण ॥ १९ ॥
यद्भुक्तमभून्नृपतेराकोटिवटावधि भटानाम् ।
यावद्भुणं तदर्पणमिदं वदन्त्याजि पिशितभुजः ॥ २० ॥
विजितो रिपुरपखेदं भेदं चेत्तस्य साधयेन्नृपतिः ।
सुहृदा योऽर्जनि भिन्नः किं न हि तं तुप्य वेधसा विहितम् ॥२१॥
एकारिमित्रयोश्चेत्परस्परं भूपयोर्भेदः ।
तदरिः परिणतनीतिः सुखमभियोगं करोतु गतभीतिः ॥ २२ ॥
शत्रोः पराभियोगश्चेदजनि निरौषधं गतो रोगः ।
परपरिभूतस्य यतः कुतोऽन्यतः पौरुषप्रसरः ॥ २३ ॥
श्रितसागरपरिखाङ्कामवाप्य लङ्कामपि दशास्यः ।
····तदेन समरपृष्ठे शयितो दयितोऽपि गिरिसुताभर्तुः ॥ २४ ॥
अभिलषतोरनुभावात्तिलोत्तमायाः किलोत्तमानुभयोः ।
सुन्दोपसुन्दयोरपि नाशो भेदादुदाह्रियते ॥ २५ ॥
मित्रे धनैरथ जनैर्नयेन विनयेन भेदिते नृपतेः ।
कुत्राहिभयव्याकुलहृदो बहिर्भावसंभवो भवति ॥ २६ ॥
भेदो भवति निहन्ता क्षुद्रेणापि स्वकेन लोकस्य ।
अन्तःशरीरजन्मा स्फोटोऽपि स्फुटतरं विनाशयति ॥ २७ ॥
निजबलपौरुषबाध्यं यदि वोपायान्तरासाध्यम् ।
नृपतिर्विज्ञाय रिपुं चण्डकृतिर्दण्डमाधत्ते ॥ २८ ॥
शक्तिः प्रभावमन्त्रोत्साहकृतां प्राह पण्डितो नृपतेः ।
संपन्नः सुखमनयापनयाय परस्य विग्रहं कुरुते ॥ २९ ॥

चिरपरिपोषितवाहः स्ववृत्तिसोत्साहसुभटसन्नाहः ।
नीरन्ध्रगुप्तमूलः प्रयाति राजा रिपोरननुकूलः ॥ ३० ॥
देवद्विजगुरुभक्तिश्चिरपरितुष्टैर्भटैर्युक्तः ।
बहुधा विमृष्यकारी नारीणां वशमुपैति नरपालः ॥ ३१ ॥
अबलोऽसि न जितकाशी प्रतिभटराशीन्परापत क्षितिप ।
जाताम्भःकणपातः क्व विनश्यत्यनलसंघातः ॥ ३२ ॥
शूरोऽसि दूरपातिभिरात्मसमैः सद्भटैरपि समेतः ।
युध्यस्व बद्धसाहसमधिकैरपि धीरवीरबलैः ॥ ३३ ॥
विजयेन राज्यभोगः संगरमरणेऽप्सरोभिरभियोगः ।
मा विरम वीर युद्धादुभयविरुद्धा पशोर्यशोहानिः ॥ ३४ ॥
युध्यस्व बद्धमानं दानं सानन्दमाचर धनानाम् ।
मा तात कातरत्वं राज्याय भज क्षणक्षयिणे ॥ ३५ ॥
निर्भरमुपार्जय यशो न वशो भूयाः कृपणतायाः ।
आकर्ण्य नरपतीनां पुण्यमतीनां पुरा चरितम् ॥ ३६ ॥
क्षुद्रेऽपि क्षोणिभुजां न जातु वैरिण्युपेक्षया स्थेयम् ।
स्वयमनिहतः समुद्रे क्षिप्तोऽपि जघान शम्बरं बालः ॥ ३७ ॥
कपटादपि रिपुहननं कुर्यादिति नीतिरौशनसी ।
हननमृते च गुरुमते बन्धादि विधीयते रिपोः कपटैः ॥ ३८ ॥
धीरः सत्कुलजन्मा सन्मार्गरतः कृतज्ञसेवी च ।
स्फुरितमतिर्नृपतिहितः सुकृतैरुपयात्यमात्यपदम् ॥ ३९ ॥
नृपहितविनिहितहृदये सुकृतिनि सचिवे निवेशितात्मभरम् ।
यद्राज्यं तेन सुखी भवति परायत्तसिद्धिरवनीशः ॥ ४० ॥
स्वस्मिन्नेव समस्तो येन न्यस्तो भरः क्षितीशेन ।
स्वायत्तसिद्धिरेषः स्वकरधृते मन्दिरे वसति ॥ ४१ ॥
दुःखं परवशमखिलं स्ववशं सुखमित्युदाहृतं मुनिभिः ।
तदनवहिते सहाये यद्वाप्यहितेऽवगन्तव्यम् ॥ ४२ ॥

राज्यं हि सचिवनृपयोरत्युच्छ्रितयोर्यदायत्तम् ।
तद्वै राज्यं तत्फलमलम्भि शकटारनन्दाभ्याम् ॥ ४३ ॥
नृपसचिवयोर्द्वयोरपि सरूपयोश्चेद्विभक्तिरवशिष्टा ।
द्वन्द्वापवादहेतुर्नियतं स्यादेकशेषविधिः ॥ ४४ ॥
पौराः परिणतनीतेः फलेन जानन्ति मन्त्रितं नृपतेः ।
इदमन्यैरुन्नीतं विपरीतं फलति निर्णीतम् ॥ ४५ ॥
हृदयं नृपतेर्मन्त्रो मर्माणि भवन्ति मन्त्रिणस्तस्य ।
तेषामपि यदि भेदो विच्छेदो जीवतस्यैव ॥ ४६ ॥
निजहृदयं सत्प्रणधिः शास्त्रं चक्षुस्त्रयं नृपतेः ।
यैः पश्यत्यतिसूक्ष्मं व्यवहितमपि दूरवर्ति वा वस्तु ॥ ४७ ॥
पर्यालोचयति न यः कार्याणि कृतान्यपि प्रकृतिमुख्यैः ।
स्वयमनवेक्षितकर्मा कृषिपतिरिव हीयते स नृपः ॥ ४८ ॥
हिमकरसमः समक्षे परं परोक्षे सखा वृषार्कस्य ।
जलधिरिव दुरवगाहस्तमाह नरपालमाङ्गिरसः ॥ ४९ ॥
अन्धोऽप्यन्योक्तपथो दण्डधृगन्योपचरणीयः ।
राजत्वमप्रतिहतैर्जनानुरागैर्भजति भूपः ॥ ५० ॥
उच्चैर्यद्यस्ति मनः किं विपदा संपदागन्त्री ।
पुरुषस्य मनसि भग्ने मग्नैरापत्सु लक्ष्यते लक्ष्मीः ॥ ५१ ॥
लघुरप्युच्चैश्चरितः क्रमेण गन्तासि गौरवं तात ।
कलया कलया काले कलानिधिः पूर्णतामेति ॥ ५२ ॥
भज लघुमपि भजमानं मानं मा वर्धयावलिप्तस्य ।
यदि सर्वत्र समत्वं श्रियोऽसमत्वं विमुञ्च योगीव ॥ ५३ ॥
हृतमथ मधुरतरैरपि भूमिभृति व्याप्तैर्बहुभिः ।
प्रतिजानामि समृद्धिं साहसमुक्ते च नित्यमुद्युक्ते ॥ ५४ ॥
इयमत्र कयापि दिशा नीतिदृशा दर्शिता पदवी ।
चाणक्याद्यभिधानाज्ज्ञेयनिधानादथान्यदुन्नेयम् ॥ ५५ ॥

इति श्रीहरिहरसुभाषिते राजनीतिप्रकरणम् ॥ ७ ॥

प्रस्तावे समयादेर्वर्णनमाकर्णयन्नृपतिः ।
प्रायः प्रसीदतीति प्रसादयेदेनमेतेन ॥ १ ॥

कान्ते स्नेहनिधौ समीयुषि मधौ जित्वा श्रियं शैशवीं
विश्लेषादितरस्य पाण्डिमभृतामालीलतानामियम् ।
कर्तुं नूतनचित्रपत्ररचनां किं काननश्रीरिमां
प्राचीनां पवनाञ्चलेन परितः पत्रावलीं लुम्पति ॥ २ ॥

दरोन्मीलन्मल्लीमुकुरकुहराभ्यन्तरगतं
त्वरास्वाद्यं सद्यो दलमविकलीकृत्य सकलम् ।
समीपे संविश्य क्षणमथ परिक्रम्य परितो
न पातुं हातुं वा प्रभवति मरन्दं मधुकरः ॥ ३ ॥

अन्योन्यस्य नियन्त्रणापरिभवादप्रौढशीतातपा-
त्पुष्प्यात्किंशुकचूतनूतनदलाविर्भूतशाणश्रियः ।
पद्मोल्लासितगन्धवासितवहद्वातावदातद्विषो
मोदोन्मादजुषो हरन्ति हृदयं वासन्तिका वासराः ॥ ४ ॥

प्रसूनपटलारुणोन्नतपलाशजालक्षका-
न्मनांसि मदनो बलाद्दहति मानिनीनां मुहुः ।
न चित्रमिदमुद्भटा यदिह भृङ्गधूमावली
वियोगिनयनाञ्चलीर्नयति खेदमस्राम्बुभिः ॥ ५ ॥

संततागतवसन्तमारुतप्रोल्लसल्ललितपल्लवोर्मिभिः ।
प्लाविता वनलताभिलाषिणः शाखिनः किमनुरागसागरैः ॥ ६ ॥

कर्णाटीकेलिवाटीविटपिनवदलान्दोलनाश्लोलवाला-
च्चञ्चच्चाम्पेयमालानिविलपरिमलाकर्षणोत्कर्षभाजः ।
वाता दातार एते मलयजमधुरामोदपूरैः प्रमोदा-
न्गोदावीचीविनोदार्जितजडिमगुणानुद्वहन्तो वहन्ति ॥ ७ ॥

व्याधूतचूतनूतनसौरभघनमञ्जरीपरीलब्धाः ।
वाताः स्मरानुयाता वसन्ति वासन्तिकासु लतिकासु ॥ ८ ॥

संभुक्तसुरभिमीनो रविरुच्चैरश्विनीमुपारूढः ।
स्फीताचरः सहेलं खेलति मेखेण राजेव ॥ ९ ॥

हित्वा हित्वा मधुरमनसो वीतकालान्नरसाला-
नन्तःपुष्पामपि मधुलिहः पाटलां पालयन्ति ।
तत्तन्वीनां स्तनशिरिशिरो नूनमावोढुकामो
जातः स्वीयोत्सवसमुदयं वीक्षितुं स्वेदबिन्दुः ॥ १० ॥

पाटलापरिमलापहारिणः कुञ्जकोषझरगूढचारिणः ।
तस्करानिव तपर्तुवासरे प्राप्नुवन्ति न जनाः समीरणान् ॥ ११ ॥

रविकिरणानुगृहीता ग्रीष्मेष्वणवोऽपि रेणवो धरणेः ।
चरणं दहन्ति सुचिरोपमर्दनं कः क्षमो भवन्क्षमते ॥ १२ ॥

माद्यच्चण्डमरीचिमण्डलचलत्तेजोऽनलत्रासतो
दूरोन्मुक्तवियत्पथं विचरयन्वातं बलान्निष्कथम् ।
कुर्वंस्तायमहो कदुष्णकलुषं भूयस्त्रिषन्द्राघय-
न्प्रस्वेदेषु वपूंषि निष्कुथयति ग्रीष्मोऽयमूष्मोल्बणः ॥ १३ ॥

उपभुक्ताशेषवृषं धावन्तं मृगशिरोंऽशभोगाय ।
कः खेचरकेसरिणं पश्यतु भास्वन्तमन्तकप्रतिमम् ॥ १४ ॥

स्वपिति ग्रीष्मभयादासायं सुखमाश्लिष्टसवातच्छायम् ।
जन्तुर्यत्नशतान्यारभतां को नामान्यत्रैतल्लभताम् ॥ १५ ॥

तापतीभ इव तोयचरोऽभूद्ग्रैष्मिकेषु दिवसेषु मनोभूः ।
यज्जले विहरतामिह यूनामाविरन्ति रतिकेलिरनूना ॥ १६ ॥

सारङ्गाः परमादरादगणितप्रौढातपाः पादपा-
नारुह्य स्फुटमाह्वयन्ति विरुतैरागामिनीं प्रावृषम् ।
औत्सुक्येन समीयुषां मधुलिहामन्तःस्पृहादन्तरं
ब्रूते नीपवनीषु हर्षजननीं संभाविनीं संपदि ॥ १७ ॥

हृष्यन्तश्चिरदुर्गता इव घने दातुर्युपर्युद्यते
दातुं वारिवसून्यसूनिव पुरःप्राप्तं परिस्पर्धिनः ।

झञ्झावातविधूतपत्रमुखराः शाखाकरास्फालिनः
किं वर्षासु परस्परेण कलहायन्ते धरित्रीरुहः ॥ १८ ॥
अस्याङ्के करपट्टभासि चपला श्रीः स्वर्णरेखायते
धारासारघनं सुदर्शनमदश्चक्रं जगत्पश्यति ।
प्रोद्यद्वनमालमज्जनरुचा देहेन पीताम्बरं
दूरोन्नीतशिखण्डमण्डलमिदं रूपं हरेरम्बुदः ॥ १९ ॥
एकत्वं न रसैः कयोः समजनि स्त्रीपुंसयोः प्रावृषि
प्राप्तौ यत्र सनिर्भराविह धराकाशौ चिरादेकताम् ।
योषित्सङ्गमगूढसर्वतरुणः कालोऽयमालोक्यते
छन्नः क्वापि दिवा युवापि निशया क्रोडीकृतः क्रीडति ॥ २० ॥
मैथुनभोगोपरतः पयोदमलिनाम्बरावरणः ।
पामर इव रविरधुना प्रकटं वर्षासु कर्कटं भुङ्क्ते ॥ २१ ॥
म्लानान्नीपतरोरपीपतदिमान्संधिः शरत्प्रावृषो-
रन्तःकोरकितामहो मधुलिहो जातीमवातीतरत् ।
पुंहंसान्समचीकरत्कृतधियो भाप्येषु वागुद्यमं
किं केकानिगदं त्वजीगमदतिक्लैब्यं कलापित्रजान् ॥ २२ ॥
सिंहादवाप्य कन्यां सैंहीमयमाश्रितो वृत्तिम् ।
विकिरति कैरवमुक्ता घनकरटिघटाविदारणो भानुः ॥ २३ ॥
शुभ्रैरभ्रकुलैः सितं समकृताकाशं सहः कैरवै-
र्जातीभिर्विपिनश्रियो विकसितैः काशैरियं काश्यपी ।
चञ्चच्चन्द्रमरीचिवीचिभिरिमाः किं च क्षपास्तत्किमु
क्षुब्धक्षीरसमुद्रमुद्रितहरित्क्रोडे शरत्क्रीडति ॥ २४ ॥
उत्सृज्याम्बुधिजामुखाम्बुजसुखालोकव्रतं यश्चिरा-
द्देवः सेवितवान्सरोजनयनो निद्रां समुद्राम्भसि ।
सोऽप्युत्तुङ्गभुजङ्गभोगशयनाज्जागर्ति मत्स्योत्सवे
सोऽयं शारदशीतरोचिषि चमत्कारः कथं कथ्यताम् ॥ २५ ॥

जालोद्गतैरुज्झघनोत्कटातटैर्विकाशिकाशैः शितकेशपेशला ।
पुरस्फुरन्नर्तयतीव खञ्जनं शरज्जरद्वारवधूरिवेक्षणम् ॥ २६ ॥

शरदमपसरन्तीं युक्तमेषा सरःश्री-
रनुसरति विनोदान्कौमुदानाददाना ।
उपसरति कराले हन्त हेमन्तकाले
भवति किमिति शालिक्षेत्रपाणिप्रमोदः ॥ २७ ॥

नीचस्त्वमसि तुलायामयमुच्चैः कार्तिकीशशाङ्क इति ।
शरदं काशविकाशादुपाहतरतिं मुमोच मलिनोऽर्कः ॥ २८ ॥

शीतैरुदीतैर्निकृतं निसर्गान्मार्गादपि भ्रंशितमंशुमन्तम् ।
दृष्ट्वा सरो वा रतवासरो वा दैन्ये यदन्वेति न चित्रमेतत् ॥ २९ ॥

नीहारतूलभृतमम्बरमेतदुच्चै-
रासाद्य नाद्य मिहिरो रविरभ्युपैति ।
दीने दिने द्रुतमनेन विनेह शोच्ये
नोच्येत केन तरुणं तिमिरावरोधः ॥ ३० ॥

स्पृष्टं वारि व्यथयति मुहुर्वह्निदाहावशिष्टं
कम्पः कष्टं नटयति वपुर्वादयन्दन्तवाद्यम् ।
तूलस्थूलावरणविकलं हन्त हेमन्तजाता
वाताः सूचीनिचयवचितप्रायतां प्रापयन्ति ॥ ३१ ॥

वृश्चिकसंदंशवशान्मलिनमुखो जातवेदन इवायम् ।
पौषभिषजोपनीतं वियन्मणिर्मूलमुपभुङ्क्ते ॥ ३२ ॥

निर्गतान्यकुसुमे हिमागमे संनिषेव्य तिलसूनसंपदम् ।
भाविकुन्दमकरन्दबिन्दवे मन्दमन्दमलिवृन्दमञ्चति ॥ ३३ ॥

सोत्कम्पमस्मिञ्छिशिरे शरीरं शङ्कोचितं को न करोति जन्तुः ।
नीहारतूलप्रकरप्रवेशान्निशा परं व्यायतकायमास्ते ॥ ३४ ॥

अध्वन्यानां शिशिरसमये चण्डचाण्डालकाण्ड-
प्रायाः कायानहह पवनाः क्लेशयन्तो विशन्ति ।

बन्धन्त्येते सपदि सुदृशां दुर्भगानामपीह
प्रौढाश्लेषाश्लथितदयितं मूर्ध्नि सौभाग्यपट्टम् ॥ ३५ ॥
निन्दितवह्निरनिन्दितभानुः श्रितसोष्मस्त्रीस्तनगिरिसानुः ।
तूलस्थूलावरणास्तरणः शिशिरं शमयति सम्यक्तरुणः ॥ ३६ ॥
शिशिरेऽनुधावति रिपौ धनुरप्युन्मुच्य भानुरपयातः ।
मकरालयमपि तीर्णः किं भीरुः कुम्भमाविशति ॥ ३७ ॥
आविष्कुर्वन्निव नवनवेनादरेणानुरागं
सर्वाङ्गीणं सुचिरविरहोन्मूर्च्छितायां नलिन्याम् ।
त्रैलोक्यान्धीकरणतिमिरद्वेषरोषारुणत्वं
व्याहुर्वान्ता किमयमुदयत्यम्बरे तिग्मरोचिः ॥ ३८ ॥
इदमनुचितहोतुः कोऽपि होमावसान-
ज्वलदनलमवादीत्कुण्डमाखण्डलस्य ।
मणिघटमभिषेके प्रातरस्योचुरेके
कलितकिरणतोयं मण्डलं चण्डभासः ॥ ३९ ॥
व्यधित विधुमधीनं वल्लभं वारुणीति
स्फुरदरुणितमास्यं तिर्यगावर्तयन्त्याः ।
सुरपतिहरितो यत्कुण्डलं व्यक्तमेकं
तदिदमुचितमूचुर्मण्डलं चण्डभासः ॥ ४० ॥
प्रायः प्राचीप्रमदाभिहतः प्रागचलप्रासादोत्पतितः ।
उदयति रविरतिशोणिमशीलः कुङ्कुमकेसरकन्दुकलीलः ॥ ४१ ॥
सवितरि चिरवैरिण्युत्थिते निष्पतन्तो
भयविचलितपक्षा गोलताप्रान्तरक्षाः ।
मधुकरनिकराणां कैतवादन्धकाराः
प्रियकुलमदसीयं किं सरः संश्रयन्ते ॥ ४२ ॥
विरहेण रवेर्दिनावसाने परिपीतानि विषाणि वारिजिन्यः ।
कमलोदरनिःसरद्भिरेफव्यपदेशादधुना किमुद्गिरन्ति ॥ ४३ ॥

त्वमन्यहरिदङ्गनाविहरणव्यपेतक्षपः
स्पृशन्नपगतोऽत्रपः किमधुना करैर्मामिति ।
प्रसार्य कमलं करं भ्रमरभाङ्कृतिव्याजतः
समाचरति पद्मिनी किमु रवेरुपालम्भनम् ॥ ४४ ॥
मध्याह्निकैर्मिहिरवह्निकरालकीलैः
काष्ठोत्करादिव परिज्वलतः पतद्भिः ।
अङ्गारकैरिदमपूरि जगत्किमन्य-
त्तेजोऽपि नायनमिहायनमुज्जहाति ॥ ४५ ॥
नीहावैर्विहगैस्तिरोहितगिरो निर्वातनिःस्पन्दना
मध्याह्ने मिहिरातपेन तरवस्तप्ता इवोन्मूर्च्छिताः ।
शोकोन्मादभरेण पादपतितास्तेषां तु जाया इव
च्छायाः संकुचितोपतप्ततनवः क्रोशन्ति झिल्लीरवैः ॥ ४६ ॥
रविरयमभूत्प्रागारूढो नभःशिखरं शनै-
र्झटिति पतति प्रत्यक्सिन्धौ परिस्खलितस्थितिः ।
कथमपि चिरायासादास्राद्यते चिरमुच्चकै-
र्विधिरयमधः कर्तुं किंचित्पलं न विलम्बते ॥ ४७ ॥
विधिना विनिपातनाय नीतो रविरस्ताचलमम्बुधावगाधे ।
मुखमुद्रणमम्बुजैरुपेतं प्रणयं के विपदि प्रमाणयन्ति ॥ ४८ ॥
चिरकरपरिमृष्टं भानुबिम्बं दिनान्ते
सकुतुकमिव शोणं कालकापालिकेन ।
चरमशिखरिकण्डान्तस्थलीं नीयमानं
विशति भसितपिण्डं गैरिकैर्लिप्तमेतत् ॥ ४९ ॥
प्राची कलावत्युपयाति कान्ते सायं सपत्नी स्मयतेऽस्मदीया ।
इतीव शोणं सपदि प्रतीची वर्षार्कबिम्बं वदनं पिधत्ते ॥ ५० ॥
संध्यासङ्गपिशङ्गवारिदघटाचञ्चज्जटासंकटा-
दीषद्दर्शितचारुचन्द्रकलिकाहान्तालिकान्तद्युतिः ।

क्वापि क्वापि वनालिनीलिमसमाश्लिष्टारुणाभाष्टदि-
ग्द्वीपित्वक्पटिधूर्जटेर्न हि घटेतैतद्वियत्किं वपुः ॥ ५१ ॥
नक्षत्राली पद्मकुञ्जे मृणाली चक्रेणार्केणार्धभुक्ता विमुक्ता ।
यद्वा संध्यारागसिन्दूरवीथीयुक्ता शुक्तिः किं कलावत्कलेयम् ॥ ५२ ॥
चरमाचलव्यवहितस्य रवेः किरणावशेषमवरोद्धुमिव ।
कथमेकदैव सहसा परितस्तमसा समाववृतिरे हरितः ॥ ५३ ॥
यान्यासन्वासरश्रीविरचितमिहिरोदारदीपोपविष्टा-
त्संसृष्टा वाक्कपालायितवितनुरियं मीलताकज्जलानि ।
भूमीभाण्डे हरिद्भिर्युवतिभिरभितः पात्यमानानि मन्ये
तान्येतान्येव संप्रत्यविरलतिमिरस्तोमभावं भजन्ति ॥ ५४ ॥
दत्तोऽष्टांशुकवारकाशमभितोऽप्याकाशमाशु ग्रस-
न्नद्वैतं महसामुपाहृतरसां क्ष्मामन्धकूपे क्षिपन् ।
मत्वैतान्यपि तैजसानि सहसा चक्षूंषि मुष्णन्नहो
द्रोहोन्मादमयस्तमिस्रनिचयस्त्रैलोक्यमाक्रामति ॥ ५५ ॥
अधिगगनमनेकास्तारका राज्यभाजः
प्रतिगृहमिह दीपा दर्शयन्ति प्रभुत्वम् ।
दिशि दिशि विलसन्तः सन्ति खद्योतपोताः
सवितरि परिभूते किं न लोकैर्व्यलोकि ॥ ५६ ॥
समुदेति लम्बितालकचुम्बितमिव कैतवात्कलङ्कस्य ।
प्राचीललाटपाटलचन्दनसिन्दूरबिन्दुरयमिन्दुः ॥ ५७ ॥
प्राच्याः किं वदनं दिनेशविरहाद्व्यक्ताज्ञनास्रं शशी
कान्दर्पः किमु दर्पणो दिनपरित्यागोन्मिषन्मालिमा ।
किं दैवामृतपाकपात्रमुदितान्तर्बाष्पमुज्जृम्भते
किं वा पञ्जरमभ्रकीयमुदरव्यक्तेन्द्रलीलामृगम् ॥ ५८ ॥
अस्तग्रस्तगभस्तिमत्करततिन्यङ्गीतचञ्चूपुटी
पाटीराद्रिमथो हिमाचलमधः प्रक्षिप्य पक्षद्वयम् ।

पश्चादुन्नतपुच्छपुञ्जमुदयत्प्राचां प्रकाशच्छला-
दण्डं मण्डलमैन्दवं जनयति व्यक्तं बकोटीवियत् ॥ ५९ ॥

निशा सूते सूनुं सपदि सुरतानन्दमिति य-
त्पुरः प्राची दूर्वाचितमकृत पिष्टातकभृतम् ।
तदेतन्नः पात्रं स्फुरति दरसिन्दूरवलितं
शशाङ्केऽयं शोणद्युतिरिति मितिं कोऽपि कुरुते ॥ ६० ॥

दुग्धाब्धेर्नवनीतमन्वहमयं निःसार्य कालः क्रमा-
त्पिण्डं पूर्णतरं व्यधादधिवियद्भाण्डं विधोर्मण्डलम् ।
सान्निध्यं तु यथा यथाम्बरमणेर्वह्नेरिदं नीयते
तत्तापेन तथा तथा द्रववशादासादितं क्षीयते ॥ ६१ ॥

किं यूनां मृगनाभिलिप्तमुडुभिः कर्पूरपक्षाक्षरै-
र्व्योमाज्ञापनपत्रमत्र परताशान्त्यै स्मरः प्राहिणोत् ।
अन्तर्लाञ्छनकल्पिता गुरुमषी तन्नामवर्णाङ्किता
यत्रायं घनचन्दनद्रवमयी मुद्रा समुद्रात्मजः ॥ ६२ ॥

उद्भियमायेन्दुकरैरुन्मज्जत्यन्धकारवारिनिधेः ।
क्वापि क्वापि विलग्नच्छायाजम्बालधोरणी धरणी ॥ ६३ ॥

अजनि रजनिरन्या चन्द्रमःकान्तिरन्या
विपुलचपलवीचिव्याचिता काचिदेव ।
सतरुगिरिसरिद्भिः किं हरिद्भिः समेतं
धवलिमनि धरित्रीमण्डलं मग्नमेतत् ॥ ६४ ॥

इति श्रीहरिहरसुभाषिते समयवर्णनप्रकरणम् ॥ ९ ॥

शृङ्गारे धनभाजामाजानिक एव मानसो मोदः ।
तस्मान्नृपतिसभायां पठनीयानीदृशानि पद्यानि ॥ १ ॥

संचारं जडिमा गिरं मधुरिमा गण्डस्थलं स्फीतिमा
वक्षोऽपि द्रढिमा त्रिकं च तनिमाप्याक्रान्तमुत्कण्ठते ।

ताटङ्कं निभृतेन धारय जहौ बाल्यावलीभृत्तनुं
वक्तुं वै सममेतदक्षि किमभूत्कर्णान्तिकं गन्तुकम् ॥ २ ॥
काञ्ची कांचिदियं चकार जघनन्यस्ता गतेर्मन्दतां
गाढं बद्धमिदं च कञ्चुकमदादुच्छूनतां वक्षसः ।
नेत्रप्राप्तमथाकुलं कलयति श्रोत्रावतंसद्वयं
तत्कोऽयं बत मत्प्रसाधनविधौ सख्यैषमस्त्वत्क्रमः ॥ ३ ॥
किं परा विनपरापतन्घनाः किं परुन्नरमरुन्नकैतकः ।
मोहरोहणतया भयावहो भाव एष विषमः किमैषमः(?) ॥ ४ ॥
सव्रीडस्मितमधुराधरान्तकान्तिर्यत्तिर्यङ्नयनतरङ्गितावतारः ।
जानीमः समजनि यौवनोपदिष्टैर्मुग्धाया मनसि मनोभवाधिवासः ॥ ५ ॥
देवैरुद्गमितोऽङ्गभृन्नजलधेः किं त्वास्यमस्या विधुः
संश्लिष्यैव यदेष मण्डनवशोन्मिश्रान्यमून्युद्गतः ।
कम्बूकण्ठमथामृतं विहसितं शैवालजालं कचा-
न्मुक्ता एव रदात्प्रवालमधरं मीनावुदारे दृशौ ॥ ६ ॥
अजनि शिशिरशीलं शैवलं सागरे य-
च्चिकुरमकृत कामस्तन्वि ते किं न तेन ।
वहति कुटिलमेनं हेतुना केन मूर्धा
वदनविधुरयं चेत्सादरो नादसीयः ॥ ७ ॥
उदयति तलिच्चित्रं मित्रं रतेः कमलद्वयी
कुसुमितनवस्तम्भे रम्भे विधाय तनोरधः ।
तलिति वलति व्योम व्योमाश्रयं च गिरिद्वयं
गिरिपरिसरे कम्बुः कम्बौ कलानिधिमण्डलम् ॥ ८ ॥
जलजकमलकुड्मलौ स्तनौ ते तरुणि तनूसरसो रसोर्मिभाजः ।
स्फुटमियमनयोस्तु नाभिनिम्नस्थितनवनालति बालरोमराजिः ॥ ९ ॥
विधौ वदनकैतवादिह तवातिदीप्तोदिते
स्तनाचललतादपि स्फुटपलायमाना घना ।

कृपाभयवशादिवाविशति रोमराजीमिषा-
दियं तिमिरघोरणी किमु गभीरनाभीह्रदम् ॥ १० ॥
उन्नयति नाभिनिम्नान्मुक्तावलिपाशिरोमराजिनलम् ।
स्मरशरवः स्तनभूधरनिपतत्तरुणाक्षिपक्षिबन्धाय ॥ ११ ॥
हृदाश्लेषोदारः परिमृशतु हारः स्तनतटं
नटत्वेतद्भण्डे कुवलयदृशः कुण्डलमपि ।
स्मितालम्बी संवाहयसि यदि बिम्बाधरदलं
फलं वीटीराग त्वदुपरि न जागर्ति जनुषः ॥ १२ ॥
चित्रं तरुणिमराज्ये समाश्रिता बलिभिरप्यबला ।
किमपरमुरोजशंभुर्जीवातुर्जायते मनोजस्य ॥ १३ ॥
विसर्पत्कालिन्दीलहरिपरिपाटीपरिमृशा
दृशा दीर्घापाङ्गक्रमणरमणीयं वलितया ।
निरुन्मीलो निलोत्पलदलकलापैर्न कतिधा
सुधास्निग्धासारस्नपित इव सद्यः समभवम् ॥ १४ ॥
प्रियेक्षितायाः पतिनेत्रपातस्नपाभरैर्दूरमपाकृतोऽस्याः ।
रोमाङ्कुरो रङ्कुविलोचनायाः कपोलयोः केन निवारणीयः ॥ १५ ॥
स्मितमधुरमेत्य निभृतं जनयति यूनोः परस्परप्रणयम् ।
दूती दृगेव चतुरा परा तु शङ्काकलङ्काय ॥ १६ ॥
अन्य इत्यनुपयातयन्त्रणं द्रागुदञ्चितवती विलोचनम् ।
मामवेत्य चकितावृताननना दन्तदष्टरसना मनागभूत् ॥ १७ ॥
प्रतिनवपुलकाली मण्डिता गण्डपाली
निगदति विनिगूढानन्दहिन्दोलि चेतः ।
सुदति वदति पुण्यैः कस्य धन्यैर्मनोज-
प्रसरमसकृदेतच्चापलं लोचनस्य ॥ १८ ॥
क्षौमेण स्तनतुङ्गभङ्गलघटावाच्छाद्य माद्यत्तरा
सद्यः प्राप्तचिरानवाप्तविषयं यद्धेयमुद्वायसि ।

तत्प्रायः परिणीय कामपि रतिं प्राग्जन्मपुण्यार्जिता-
मद्यालम्भि कुतोऽपि तन्वि कुतुकागारे स्मरेणोत्सवः ॥ १९ ॥
नैशं किमाचरति वासर एव हृद्यं
नृत्यन्निवैष करभोरु करस्त्वदीयः ।
स्मेरं सरोजमुखि वञ्जुलकुञ्जपाली-
मालीमिव त्वमनुपश्यति कस्य हेतोः ॥ २० ॥
तव तन्वि तरुणपुण्यादम्बरमणिमकरसंक्रमो जातः ।
अधिवेलि भवति नियमः फलमविलम्बेन कामस्य ॥ २१ ॥
कालीयैः कुचकाञ्चनाचलचमत्कारः किमुत्सार्यते
कीदृक्कुङ्कुमकेसरत्विषि मुखे कस्तूरिकालेपनम् ।
स्फीतेऽस्मिञ्जघने सरोजवहने किं नीलचोलार्पणं
कस्मै साहसिनि त्वमिच्छसि विधेर्विन्यासमन्यादृशम् ॥ २२ ॥
भ्रातः कङ्कण किं कदाप्यसि मयाश्लेषेषु विश्लेषितं
मातः किङ्किणि किं कृता क्वचिदपि त्वं सौरते दूरतः ।
किं मञ्जीर बहिःकृतोऽप्यसि रहस्ताताङ्घ्रिपङ्केरुहा-
त्संकेताध्वनि बद्धवैरमिव यन्मौखर्यमभ्यस्यथ ॥ २३ ॥
सविलम्बे वनमालिन्यविलोकनविक्लवस्य नयनस्य ।
अपि केलिगेहदेहलि केवलमवम्बनं त्वमसि ॥ २४ ॥
केलीसद्मनि पद्मसुन्दरमुखी मन्दाक्षमन्देक्षितं
संप्राप्तेति समीक्ष्य निर्भरतराविर्भूतचेतोभुवा ।
प्रत्युद्गम्य जवादवारितघनाश्लेषालसात्प्रेयसा
पर्यङ्कोपरि कार्यते सुकृतिना पादार्पणानुग्रहम् ॥ २५ ॥
लज्जां संमलितामुपेयुषि मयि व्याधूय कम्पच्छला-
त्सद्यः स्वेदमिषाद्व्यधायि सुदृशा धैर्याय वार्यञ्जलिः ।
भूयो मास्तु वियोगवैशसमिति प्रत्यङ्गमालिङ्गने
मद्गात्रप्रथनोचिता विरचिता रोमाङ्कुरश्रेणयः ॥ २६ ॥

तन्व्या तल्पमुपेयुषि प्रियतमे सव्रीडया निर्गतं
सख्येति त्रपयापि केलिभवनादेवापयातं बहिः ।
गाढाश्लेषनिपीडनान्निपतितामालोक्य हारावलीं
स्थातुं हन्त भिया क्षणं निविलया नीव्यापि न व्याप्तम् ॥ २७ ॥
विश्लेषज्वरवेदनासहनयोः कारुण्यकीर्णात्मना
कापि प्रापितयोः समागमसुखं यूनोर्मनोजन्मना ।
नैरन्तर्यनिवेदितात्मविशिखव्याजेन सूचीचयैः
संस्यूते वपुषी परस्परगुणैरेकात्मतामापतुः ॥ २८ ॥
अविरतविरुतकपोतीमर्पितरसमावृणोति घनवलनः ।
नवलतिकामतिकातर तरलितमुदिरद्वयीं मुदिरः(?) ॥ २९ ॥
पयोवाहारूढा नटति कदलीकाण्डयुगली
तलित्तत्र न्यञ्चत्तटिनि घटयुग्मं नटयति ।
नयत्यम्भोजन्मन्यमृतमकरन्दौ विनिमय-
न्महच्चित्रं चञ्चत्तिमिरपरिवेषो हिमकरः ॥ ३० ॥
पर्यासे सुरते विकीर्णचिकुरोद्वीर्णे प्रसूने पुरः
प्रक्षिप्ते कुचकञ्चुके क्वचिदपव्यस्ते च हारे हृदः ।
स्रस्ते लूनगुणे नितम्बवसने भग्ने च दोःकङ्कणे
प्रत्येकं निपतन्ति पङ्कजदृशो दैन्यस्पृशो दृष्टयः ॥ ३१ ॥
नीरागेऽधरपल्लवे कृतवती ताम्बूलरागार्पणं
प्राप्ते निर्गुणतां चकार चिकुरे निर्बन्धतो बन्धनम् ।
निर्वेदात्सुरतावसानसुलभान्निर्गन्तुकामं हृदः
कन्दर्पं कृपणा रुणद्धि निविलत्यस्ताञ्चलव्याजतः ॥ ३२ ॥
नीव्यां संयमनं कचे नियमनं श्रोणीतले चासनं
निःश्वासाभ्यसनं मुखे समभवत्प्रत्याहृतिर्भूषणे ।
ध्यानं प्रेमणि धारणा स्तनतटे तन्व्याः समाधिः प्रिये
निर्वेदादिव किं रतान्तसुलभात्सर्वाङ्गयोगोत्सवः ॥ ३३ ॥

तन्वी स्मारानलाङ्गारान्निर्वाणप्रायतां गतान् ।
प्रदीपयति किं कान्ते रतिश्रातेऽञ्चलानिलैः ॥ ३४ ॥
स्मरसमरपरिश्रमप्रसुप्तं मिथुनमपेतदयः प्रतिप्रतीकम् ।
परिमृशति निशावसानवातः प्रकटितमन्मथपक्षपक्षपातः ॥ ३५ ॥
जालान्तरालमालोक्य बालारुणकरारुणम् ।
शयितं दयितं प्रातः कातराक्षी निरीक्षते ॥ ३६ ॥
पर्यङ्कात्सहसावतीर्य विहिता नीवीनवीनस्थितिः
संरुद्धा कबरी कथंचन कुचाभोगोऽञ्चलेनावृतः ।
द्वारस्तम्भतले निलीय निभृतं प्रायस्त्रपाकातरं
दूरादुन्नमिताननार्धमसकृत्तन्व्या बहिर्वीक्ष्यते ॥ ३७ ॥
अङ्गाकृष्टिर्व्यथयति नखाङ्गेषु वक्षोजकुम्भा-
वास्यं जृम्भा दशनवसने दन्तदष्टं दुनोति ।
यान्त्याः खेदं व्रजति करजश्रेणिषु श्रोणिभागः
प्रातर्याति प्रगुणतरतां वैशनं नैशमस्याः ॥ ३८ ॥
भ्रमान्नामान्यस्या मयि निगदतीन्दीवरदृशः
श्रयन्मन्यौ नव्ये नयनमपसव्येन वलितम् ।
प्रणीयास्रं धौताञ्जनमहह बन्धूचितमदा-
द्विपन्नाय प्रेम्णे सपदि तिलतोयाञ्जलिमिव ॥ ३९ ॥
धन्याहमस्मि यदि नाथ मयापि नाम
तस्या निकामसुभगं सुकृतैरलम्भि ।
कुर्यामनीदृगतिवारिधुरा कथं ते
शान्तिं मनागपरथा विरहव्यथायाः ॥ ४० ॥
प्रतिरुद्धेव प्रेम्णा कुपितेन बहिः···· कृष्यमाणेव ।
अधिकेलिगेहदेहलि बाला दोलायते कृतिनः ॥ ४१ ॥
कुतस्ते देहलीस्तम्भ संभवस्तपसामयम् ।
कोपना मामनादृत्य यत्त्वां वालावलम्बते ॥ ४२ ॥

मानं मानिनि मा विमुञ्च विदुषि ब्रूयाः क एष क्रमो
यद्रागः श्रुतिगामिनोर्नयनयोरेतादृशो दृश्यते ।
किं चान्यत्कुचशंभुसेवनपरे बन्धः कथं कञ्चुके
काञ्चीसंनिधिसंगतापि लभते नीवी न मुक्तिं कुतः ॥ ४३ ॥
प्रतिषिद्धनखेन्दुसङ्गयोश्चिरमुत्सारितहारसङ्गयोः ।
किमुदेति न शंभुशोभयोः स्तनयोरप्यनयोरनुग्रहः ॥ ४४ ॥
तव गुरुतरापराधादपि बाधा गोपकोपना कुत्र ।
नितरामितरासु परं गणिता वनितासु वहति परितापम् ॥ ४५ ॥
निखिलं गोकुलभूषण .....मतिनिर्भरानुरागस्य ।
त्वयि सरुषं यत्परुषं पल्लवयति बल्लवी वचनम् ॥ ४६ ॥

इति श्रीहरिहरसुभाषिते शृङ्गारवर्णनप्रकरणम् ॥ ९ ॥

नायकनायिकयोरपि भेदा वर्ण्याः पुरो नृपतेः ।
तत्तदुदाहरणेभ्यो लक्षणमवसेयमेतेषाम् ॥ १ ॥
पतिरुपपतिश्च वेशिक इति त्रयो नायकाः कथिताः ।
एतेषां कथ्यन्ते क्रमादुदाहरणपद्यानि ॥ २ ॥
दातुं जातु पदाङ्गुलीमपि बहिस्तल्पादकल्पार्णवे
तल्पे स्थापयितुं भुजङ्गरचिते नैवोचितेयं प्रिया ।
इत्यालोच्य निरस्तकौस्तुभमधः प्रक्षिप्य हारं हरि-
र्लक्ष्मीं वक्षसि कामकातरतया संधारयन्पातु वः ॥ ३ ॥
किं दुर्जनान्न हि बिभेषि यदेषि पार्श्वं
मा मेति भीतिपरुषं परिवर्जयन्त्याः ।
संत्यक्तसाध्वसभरं परिरभ्य दोर्भ्यां
बिम्बाधरं धयति धन्यतमः प्रियायाः ॥ ४ ॥
नीता भवेत्कचन केनचिदेव यूना
किं गेह एव रमते तरुणान्तरेण ।

इत्याकुलं द्रविणपाणिरुपेत्य कामी
द्वारान्तिकं चकितमञ्चति वारवध्वा ॥ ५ ॥
एतेषामनुकूलो दक्षिणधृष्टौ शठश्चेति ।
भेदचतुष्टयमेषां वदाम्युदाहरणमेकैकम् ॥ ६ ॥
नेष्यामि हा कथमरण्यदरीषु सीतां
तामन्तरा क्व पुनरक्षिपुटं क्षिपामि ।
इत्थं वधूं विपिनसार्थचरीं विधातुं
गेहे निधातुमपि रोदिति रामचन्द्रः ॥ ७ ॥
मान्या कुन्तिनभूरभूदसुभगा कुत्राथ सात्राजिती
वैषम्यस्य कथापि मे धरणिभृत्कन्यासु नान्यास्वपि ।
इत्थं दित्सति पारिजातकुसुमं संदेहदोलायिते
भूयः पश्यति नारदस्य वदनं देवे भवेन्मे मतिः ॥ ८ ॥
नीत्वान्यत्र निशामुपेत्य सुदृशो बाष्पाम्भसा क्षापिते
वीक्ष्यात्मप्रतिमां कपोलफलके संभोगचिह्नाङ्किताम् ।
मूर्धालक्तकमानतश्चरणयोश्चुम्बन्बलादाननं
धृष्टः स्वाधरपल्लवाञ्जनमपि प्रच्छादयन्प्रोञ्छति ॥ ९ ॥
चुम्बति कपोलपालीमलीकसौभाग्यमेकस्याः ।
तत्प्रतिबिम्बितमाननमन्यस्याः स्मेरतां नयति ॥ १० ॥
भेदास्त्वेषां शतशो विमुग्धमध्यप्रगल्भाद्याः ।
प्रायेण तेऽपि कुशलैरुन्नेया नायिकाभेदैः ॥ ११ ॥
अथ नायिकाप्रभेदास्तत्र नवोढानवोढविश्रब्धा ।
मध्या तदनु प्रौढा तासामग्रे क्रमादुदाहरणम् ॥ १२ ॥
दृशं दूरात्पत्युः परिहरति किं श्रोष्यति वच-
स्तदासन्नं सद्म त्यजति किमुपायास्यति रहः ।
तदीयं नामापि श्रुतिपथमुपेतं न सहते
नन्नोढा निर्व्यूढामिह विमतिमुन्मुञ्चतु कुतः ॥ १३ ॥

सखीभिरुपनीतया करनिगूढनीवीपदं
प्रसुप्तमचिरोढया शयनसीम्नि पर्यङ्मुखम् ।
तदङ्गपरिवर्तनं सुरतसङ्गसंनर्तनं
स्मरप्रणयमन्त्रिणा सुकृतिना परं प्राप्यते ॥ १४ ॥

मयि प्रणयचञ्चलं रुचिरमञ्चयत्यञ्चलं
स्खलन्निबिडनीविकानियमितैकपाण्यम्बुजम् ।
परेण बत पाणिना युगपदेव गण्डाधर-
स्तनावरणलुब्धया व्यवसितं न किं लुब्धया ॥ १५ ॥

सीत्कारः कथमेष भाविनि भवद्दन्तव्रणैरुल्बणै-
र्वक्रं दर्शय दर्शयामि कितव प्रौढापराधं तव ।
इत्युद्वीक्षितुमुन्नमय्य वदनं द्राक्चुम्बतो राधया
गोविन्दस्य कराञ्चलेन चिबुकप्रान्ते प्रहारोऽर्पितः ॥ १६ ॥

आसामपि प्रभेदाः प्रथमामुन्मुच्य कथ्यन्ते ।
धीराधीरा मिश्रा क्रमेण कियदप्युदाहरणमासाम् ॥ १७ ॥

साकूतस्मितमेव नाधरपुटीसीमानमुल्लङ्घते
किं वाणी हरिणीदृशः सहचरीश्रोत्रात्परत्राञ्चतु ।
केलीमन्दिरमध्यमागतमपि द्राक्प्राप्नुवन्ति प्रियं
प्राक्पुण्येन शिरोऽवगुण्ठनपटप्रान्तार्धरुद्धा दृशः ॥ १८ ॥

मधुरिपुरुपयातीत्येवमुक्ते कयाचि-
च्चकितवलितवक्त्राम्भोरुहं राधिकायाः ।
समुदयति समन्तात्कज्जलोन्मज्जदञ्च-
त्कुवलयदलदामश्यामला लोचनश्रीः ॥ १९ ॥

निभृतेक्षितैकताना मयि चिरमासीद्विदूरमासीने ।
प्रतिनेत्रोपनिपाते स्मितमधरमधोमुखी स्थिता सुमुखी ॥ २० ॥

आसामपि प्रभेदास्त्रयः स्वकीया च परकीया ।
सामान्या चेत्यासां वदाम्युदाहरणमेकदेशेन ॥ २१ ॥

परिरभ्य प्रियं प्रेमप्रसारिपुलकाङ्कुरा ।
निःसाध्वसा सुखं साध्वी निशां नयति नायिका ॥ २२ ॥

सातङ्कवारितनखाङ्कमसोढदन्त-
संपातमात्महृदयादपि शङ्कमाना ।
येनार्यते(?) हमिति ते तरुणान्तराय
तस्मै नमः स्मरणजन्मशरासनाय ॥ २३ ॥

श्रीमन्तं समुपेतमन्तिकमनुप्रेक्ष्यादरादुत्थिता
हस्तन्यस्तधनं प्रवेशितवती बद्धोत्सवं सद्मनि ।
सद्यः स्रस्तशिरोवगुण्ठनपटं प्रव्यक्तवक्षःपटं
पर्यङ्के परिरभ्य नागरजनं वाराङ्गना रोहति ॥ २४ ॥

तासामष्टौ भेदाः प्रोषितपतिकाथ खण्डिता तद्वत् ।
कलहान्तरिता च तथाभिसारिका विप्रलब्धा च ॥ २५ ॥

उत्कण्ठिता च वासकसज्जा स्वाधीनभर्तृका चेति ।
उच्यन्ते संक्षेपादेताः कैश्चित्क्रमादुदाहरणैः ॥ २६ ॥

संतप्तं वपुरेतदुज्झितमिव स्यन्देन संलक्ष्यते
विक्षिप्तं भुजमुन्मुमोच वलयश्रेणीयमेणीदृशः ।
तत्याजास्यमपास्तहास्यविवशं वाक्प्रेयसी प्रोषिते
प्रस्थातुं परिरभ्य कण्ठमहह प्राणैः परं स्थीयते ॥ २७ ॥

निःश्वासेन ममाधरादपहृतो रागस्तवान्यस्त्रिया
दीर्णं तन्नखरैश्च तावकमुरस्त्वद्वेष्टितैर्मामकम् ।
शोणं जागरणेन ते मम पुनस्त्वद्वीक्षणेनेक्षणं
सर्वत्रास्मि समा तथापि विषमामाख्याय मां भ्राम्यसि ॥ २८ ॥

कोपिन्याः कतिधा व्यधायि न पदप्रान्तानतिः प्रेयसा
कुत्रासीदिह जातु जन्मनि पुनः सद्भावसंभावना ।
तस्मिन्नेत्रपथादथापसरति प्रान्तानुतापज्वराः
सद्यः सास्रझराः पतन्त्यनुचरीवक्त्रारविन्दे दृशः ॥ २९ ॥

स्वापश्वासपरम्परां परिजनस्योवाच कर्णद्वयी
नेत्राभ्यामपि दर्शिता गुरुतमस्तोमावली देहली ।
पाणिभ्यां निभृतेन नूपुरमपाचक्रे पदाम्भोजयोः
संकेतोद्यमसंभ्रमे वरतनोरासीन्मनोऽग्रेसरम् ॥ ३० ॥

समुपेता संकेतादलुलितसकलप्रसाधना सुमुखी ।
अवचनमेव ब्रूते श्वसितेन सखीषु विप्रलब्धत्वम् ॥ ३१ ॥

वनमालिनि सविलम्बे वितर्कशतकर्कशान्मनसः ।
हतया धीरतया मे चिर····सर्यापि निर्यातम् ॥ ३२ ॥

मुहुरपि बाधयति तल्पं पुनराकल्पं परामृशति ।
अधिकेलिगेहदेहलि विन्यस्तविलोचना सुतनुः ॥ ३३ ॥

परिरम्भणैश्चिरनिरन्तरिताः पुलकाङ्कुरैः किमपि दन्तुरिताः ।
परिचुम्बनैस्तरलिताः शतशः सुखमासते सुकृतिनां सुदृशः ॥ ३४ ॥

सप्तैकद्वयभेदास्तासामेवं सुहृद्भिरवसेयाः ।
एभ्यः पुनरपि शिष्टान्ब्रूमो भेदान्महद्भिरुपदिष्टान् ॥ ३५ ॥

अन्योपभोगकलुषा मानवती प्रेमगर्विता मुदिता ।
सौन्दर्यगर्विता च प्रेमपराधीनमानसानूढा ॥ ३६ ॥

संगोपितसुरताथ क्रियाविदग्धा च वाग्विदग्धा च ।
क्वापि प्रोष्यत्पतिकानुशयाना लक्षिता कुलटा ॥ ३७ ॥

स्यादुत्तमा च मध्या तथाधमा चेति सप्तदश ।
एता उदाहियन्ते भेदास्त्वासां सुहृद्भिरुन्नेयाः ॥ ३८ ॥

अनुशयवत्येवोक्ता प्रोष्यत्पतिका न भेदतो बहुभिः ।
परदेशादागच्छत्पतिकापि यथा प्रमुदितैव ॥ ३९ ॥

सहचरि कियत्प्रेयः प्राप्तौ सुखं न स दर्शितः
परुषमथ वा संदष्टौष्ठं न किं समुदीरितः ।
सुहृदयबहिर्भावासत्वं मयेव कृतं त्वया
तदननुनयं किं वा कुर्याः स एव गतत्रपः ॥ ४० ॥

सबाष्पव्यालापं प्रसरदनुतापं प्रियतमे
समासन्ने साम्ना बहु सहचरीभिर्व्यवहृतम् ।
सनिःश्वासं शून्याहितनयनमस्मेरवदनं
निविष्टाया मानः किमजनि कृशः पङ्कजदृशः ॥ ४१ ॥

सहचरि विरम ग्रथनान्मम कथनादस्य हारस्य ।
अस्मिन्नुरसि विनिहिते विरहित इव भूयते दयितः ॥ ४२ ॥

कर्णे कान्तागमनवचनाश्राविणि स्वर्णभूषां
तस्यादर्शिन्यकृत नयने श्यामिकामञ्जनेन ।
स्थाप्यः कुत्र प्रिय इति परामृश्य हारावृताङ्के
हृत्पर्यङ्के पुलकपटलीतूलिकामास्तृणोति ॥ ४३ ॥

सरसि न विहरन्ति किं तरुण्यः सखि कथमेष मयैव दैवदोषः ।
मुखमिदमवलोक्य चक्रयूनामुदयति सायमिवायमर्तनादः ॥ ४४ ॥

हितमभिहितं दीना वाचो वदन्बहु पादयोः
पतति नियतं मानावेशे वशे भवति प्रियः ।
सहचरि समाक्रान्तं प्रेम्णा परं तु चिरान्मनः
क्व नु बत पुनर्मानस्यास्मिन्मनागपि संक्रमः ॥ ४५ ॥

आलि कपालिनि जटिले पत्यावत्याग्रहैस्तवालमिति ।
हरगतमिति दुःसहमपि मुहुरपि मुखरान्निगादयति गौरी ॥ ४६ ॥

हंसैः शैवलमञ्जरीति कबरी चञ्चूभिराकर्षिता
वक्त्रे चन्द्रधिया चकार कुपिता चक्री नखैराक्रमम् ।
भृङ्गैः पङ्कजकोरकप्रतिभया वक्षोरुहो विक्षत-
स्तन्मातः करवै पुनर्न सरसीतोयावगाहोद्यमम् ॥ ४७ ॥

ग्रामतरुणस्य जाया सायाह्नसमागतेषु पथिकेषु ।
आसन्नविजनवटतटमावासस्थानमुपदिशति ॥ ४८ ॥

एकाकिन्या मम गृहमिदं यामिको मामकोऽन्धः
का मे नोदेत्यहह मनसस्तत्करेणात्र भीतिः ।

दैवेनैवं यदि न सुखितः स्याः श्रमेण प्रसुप्तः
पान्थ ब्रूमः किमिह सदृशो नैष नैशो निवासः ॥ ४९ ॥
मारोदीः क्षणमेव रोदिमि कुरु प्रस्थास्यतो मङ्गलं
सम्यक्पाकमयं प्रयास्यति सखि श्वासानिलः प्रेयसा ।
प्राणांस्थापय तत्र कः प्रभवतु प्राणेश्वरे प्रस्थिते
चेतः स्तम्भय हन्त दैवहतकं कागादिदं वेद कः ॥ ५० ॥
स्वयमेव सद्म तक्रे स्वशिरसि विक्रेतुमम्बया निहिते ।
सोद्वेगगमनपराधादपि बाधा सहचरीं शपति ॥ ५१ ॥
पूर्वस्मादधिकाधिकादरमिदं श्वश्रूषु शुश्रूषणं
भिन्नोऽयं परिचारिकासु विपुलाह्लादः प्रसादक्रमः ।
अद्यान्यः प्रतिवेशिनीषु भवनाचारौचितीसंभ्रम-
स्तत्किं केनचिदेणशावकदृशः प्रेमा समालक्षितः ॥ ५२ ॥
नाभूद्भूमिरियं सदैव सकला संकेतशय्यामयी
सर्वोऽप्येष बभूव नैव समयः प्रावृट्तमिस्रामयः ।
सृष्टिः प्रोन्मदपुंमयी न विदधे दुश्चेतसा वेधसा
मातस्तात कथं घटेत कुलटेत्यस्मादृशीनां यशः ॥ ५३ ॥
कोपः समुत्पन्नविनष्ट एव स्वान्तं प्रियप्रेमनिविष्टमेव ।
त्रासस्तदसेरनिमेष एव क्रमः कुलीनस्त्रिय एष एव ॥ ५४ ॥
एकतः प्रणयपीडनं मुधा मानधारणरसादरोऽन्यतः ।
रक्षती द्वयमिदं मनस्विनी निर्वृणोतु कथमत्र जन्मनि ॥ ५५ ॥
प्रकल्प्यापि प्रेयःस्खलितमनिशं मानविधुरा
तरामास्ते वामा दिवसहिमधामायितमुखी ।
चिरं पादप्रान्ते निपततु परं प्राणदयितो
हतोत्साहं साहंकृतिकुपितमुन्मुञ्चतु कुतः ॥ ५६ ॥

इति श्रीहरिहरसुभाषिते नायकनायिकाभेदप्रकरणम् ॥ १० ॥

सभ्यानामनुरागं समीहमानः प्रसङ्गपतितानि ।
पद्यानि पठेन्नानाविधानि विबुधादिविषयाणि ॥ १ ॥
सामगीतमपनीतगोचरं धाम तामरसलोचनं भजे ।
मूर्ध्नि यच्चरणवारि धारयन्धूर्जटिर्नटति पर्यटन्मुहुः ॥ २ ॥
लम्बालकं तदालम्बे जम्बालकलुषं मुखम् ।
दृष्टं व्यादाय विस्पष्टं मात्रा यत्राखिलं जगत् ॥ ३ ॥
वृन्दारण्यविभूतिभूतलपुषां देवद्विषामायुषां
शेषं शेषशिरश्चिरायितधराभारावताराजिरम् ।
नन्दानन्दलतालवालमनिशोन्मादं यशोदामुदा-
माभीरीनयनाञ्जनं किमपि तत्कैशोरमैशं नुमः ॥ ४ ॥
कुत्रासीस्त्वमिति यशोदया सरोषं संरुद्धे तनयधियान्तरङ्ग एव ।
कालिन्दीपयसि पलायितस्य विष्णोरुत्तालं हसितमलंकरोतु चेतः ॥ ५ ॥
त्वं चिरोपचितरोषलक्षणं किं करोषि यमकिङ्करेक्षणम् ।
नन्दमन्दिरविसारिवारिदश्यामलं मदवलम्बनं महः ॥ ६ ॥
स्वं संभाव्य यदङ्घ्रिवारि सरिदस्पर्शेन शोच्यं शिवः
संभोगप्रतिकूलमप्यचलभूरर्घं स्मरारेरभूत् ।
निर्माल्यप्रणयावशेन मनसा यस्याङ्गतो निर्गतं
चक्रे मन्दिरमम्बुजन्म जगतां धाता····सयास्तु वः ॥ ७ ॥
पीयतामुदधिमन्थनोद्धृतं सादरैस्तदमरैः किलामृतम् ।
कालकूटकवलस्य काटवं सोढुमीश्वरमृते न पाटवम् ॥ ८ ॥
संबिभर्तु भुजगेश्वरं गले भस्म लिम्पतु कलेवरे हरः ।
बंभ्रमीतु वृषभेण कः परः पार्वतीप्रणयसुन्दरः सुरः ॥ ९ ॥
प्रभवतु भुवनानां निग्रहेऽनुग्रहे वा
ननु कलयतु देवो नानुकारं हरस्य ।
निविशति शशिलेखा किं किरीटे परेषा-
महह वहति कस्य स्वर्धुनी मूर्धनीयम् ॥ १० ॥

धौताः स्वर्धुनि मूर्धजास्तव जलैर्जाता जटाजूटता
स्नातं वारिणि भस्मधूसरमभूदङ्गं क एष क्रमः ।
किंचान्यत्परिमार्जनेन पयसो भालेऽनलेनोत्थितं
निष्पीतेऽम्बुनि कण्ठ एव गरलज्वालाकुलः क्ष्म्यति ॥ ११ ॥
यस्य यस्य तव जातशीकरः स्वस्तरङ्गिणि शिरोऽधिरोहति ।
तेन तेन चरणोदकीकृता मोदमञ्चसि क एष विभ्रमः ॥ १२ ॥
त्रिजगति नगरीणां रीतिराजानकीयं
भवति नृपतिरेकः सन्तु पौराः सहस्रम् ।
इह पुरहरपुर्यामस्तमर्यादतेयं
दिवसमपि निवासी यः स काशीनरेशः ॥ १३ ॥
शैलाः सन्तु शतं सुमेरुहिमभृन्मैनाकविन्ध्यादयः
किं त्वेषां महिमावधारणविधौ गोवर्धनो वर्धते ।
सप्ताहानि मुरारिपाणिकमलक्रोडोपरि क्रीडता
येन क्ष्माधरलक्षपक्षदलनः शक्रोऽप्यनुक्रोशितः ॥ १४ ॥
अहो महीयसां पुंसामुपर्युपरि पौरुषम् ।
रामेणाजगवं शम्भोर्भग्नमम्भोजनालवत् ॥ १५ ॥
स्पर्धामर्धाङ्गिन्याः कान्या कर्त्री गिरीन्द्रनन्दिन्याः ।
सा तदपि जह्नुकन्या मूर्धन्या धूर्जटेर्जयति ॥ १६ ॥
तुल्यं गाधिसुतेन वन्दितमहो पातुं सहैतद्विरा
गाढे किं च गुणे समं सुजनुषा सद्यः समायोजितम् ।
वैदेहीहृदयेन दाशरथिना द्राक्साकमाकर्षितं
भग्नं भूमिभुजां भुजाकुलमदैः सार्धं स्मरारेर्धनुः ॥ १७ ॥
वत्से वेत्सि कुलं त्वमेव किलये शुश्रूषणं लक्ष्मणे
जानात्याचरितं विपत्तिविधुरे पत्यावपि त्वादृशी ।
विन्ध्यारण्यचरी चिराय शबरीमुख्यं विदध्या इति
ध्यातुं वक्तुममज्जि लोचनपयःकुल्यासु कौशल्यया ॥ १८ ॥

यदेतन्मे चेतः कनकहरिणेनाहृतमभू-
न्मम त्रासाक्रन्दे त्वमपि बत संदेहमकरोः ।
हृता सीता दैन्यान्यकृत नियतं हारिणि खले
कुले कुत्सा वत्साजनि चिरमियं चण्डमहसः ॥ १९ ॥

बाणान्वारिकणान्किरन्नवतलित्संजातसिञ्जागुणं
वा····क्कार्मुकमेतदैन्द्रमधुना संधाय किं धावसि ।
किं संपाद्यकदम्बकुञ्जलकुलैर्दावानलैर्दुर्दिनं
वैदेहीविरहेऽपि जीवितभृतो रामस्य किं दुःसहम् ॥ २० ॥

हे हे का दयिते दशां परवशा केकाभिरेकाकिनी
व्योमव्यापिनि कोपिनि प्रमुदिते पाथोधरे प्राप्स्यसि ।
मिथ्यावेत्थमशङ्कि जीवितमसि त्वं रामभद्रस्य मे
देवि स्याः सहनक्षमा न विपदः कस्याः क्षमानन्दिनि ॥ २१ ॥

अत्यन्तव्यवधानलब्धजनुषो जात्यापि भिन्नक्रमाः
सांनिध्यं विधिना कुतूहलवता कुत्रापि संप्रापिताः ।
गच्छन्त्या मरणं गुणव्यतिकृता भेदं न भूमीरुह-
स्ते काष्ठामपि निष्ठुरा गुणगणैर्येऽनेकतां प्रापिताः ॥ २२ ॥

गुणगौरवमेव गाहमानाः कृतिनः किं गणयन्ति दूषणानि ।
न जहाति विहारि नक्रचक्रं बत रत्नाकरवारि दानवारिः ॥ २३ ॥

विप्रियमप्याकर्ण्य ब्रूते प्रियमेव सर्वतः सुजनः ।
क्षारं पिबति पयोधेर्वर्षत्यम्भोधरो मधुरमम्भः ॥ २४ ॥

उत्कर्षवान्निजगुणो यथा यथा याति कर्णमन्यस्य ।
धनुरिव सुवंशजन्मा तथा तथा सज्जनो नमति ॥ २५ ॥

म्लायसि परनिःश्वसितैः स्वच्छतया कं निवेशयसि नान्तः ।
अयसा त्वन्निर्माता मुहुरविधाताप्ययोमयो भवति ॥ २६ ॥

आसीत्कल्पमुदम्बुदम्बुनि चिरं भेजे च भालानलं
भर्म्यस्य प्रतिमासकर्म हुतभुक्कुण्डेऽप्यहोषीद्वपुः ।

तीव्रैरेव तपोभिरिन्दुरकरोदित्थं जनुर्जापनं
किं कुर्याद्विधुरो न वाञ्छति विधिस्तल्लाञ्छनप्रोञ्छनम् ॥ २७ ॥
क्षीणः क्षीणः क्षपयसि निशाः पूर्णतायां पुनस्ते
राहोरास्ते भयमयमपि स्वान्तशल्यं कलङ्कः ।
एतास्वापत्स्वपि हिमरुचे त्वां विनोल्लासलोलं
कोऽलं कुर्यात्सपदि सकलं भूतलं भामिरामिः ॥ २८ ॥
अपि दोर्भ्यां परिरब्धा बद्धापि गुणैरनेकधा निपुणैः ।
निर्गच्छति क्षणादिव जलधिजलोत्पातिपिच्छिता(त्पातपिच्छला)लक्ष्मीः॥
कस्य करान्न स्खलिता नीरविधिक्लेदपिच्छिला लक्ष्मीः ।
भृगुचरणधूलिपरुषे हृदि परिरब्धा हरेः स्थिरेयमभूत् ॥ ३० ॥
धत्ते वक्षसि कौस्तुभोपलमयं मत्वा श्रियः सोदरं
तन्नाभीगृहमाकलय्य मकरावासं मनाङ्नोज्झति ।
तन्नामप्रणयान्न लुम्पति हरिः श्रीवत्समङ्के स्थितं
किं केन क्रियतां स एव यदभूदेवंदशः स्त्रीवशः ॥ ३१ ॥
अपारे पाथोधौ किमिति सतिमिग्राहगहने
निलीय श्रीनाथः स्वपिति भुजगे शङ्कित इव ।
किमेतावद्भिर्वा भवतु किल सर्वातिशयितः
प्रियासंश्लिष्टाङ्को व्यपगतभयं को निवसतु ॥ ३२ ॥
लक्ष्मीजनयितुर्जाताः कियन्तो जलजन्तवः ।
स्वत्रासप्रार्थनापात्रं सोदरोऽस्याः सुरद्रुमः ॥ ३३ ॥
येषामेकतरेण केनचिदपि प्राप्तेन पर्युत्सुको
मर्यादामवसाद्य माद्यति जनः क्षोणीमपि क्षोभयन् ।
वीचीभिर्विलुठन्ति तानि परितो रत्नानि वारांनिधे-
र्नायं प्राक्प्रकृतिं जहाति महतां वित्तैर्विकारः कुतः ॥ ३४ ॥
एकोऽम्बुधिर्जगति जीवति येन तानि
तावन्ति हन्त सलिलानि समुच्चितानि ।

येभ्यः कथंचिदपि किंचिदमी पयोदाः
पीत्वा चिराय धरणीमपि तर्पयन्ति ॥ ३५ ॥
शैला निलीना निभृतं यदन्तःशैवालबालाङ्कुरकोटरेषु ।
स एव पाथोधिरगस्त्यहस्तरेखाविशेषान्तर एव तस्थौ ॥ ३६ ॥
देवैर्यद्यपि तक्रवद्विमथितः केदारवद्वानरै-
र्बद्धः सिद्धवदञ्जनात्मजनुषा कुल्यावदुल्लङ्घितः ।
किं चासीच्चुलुकेऽम्बुबिन्दुवदयं द्राक्कुम्भयोनेर्मुने-
र्नापारोऽयमिति प्रथा जलानिधेरासीदथापि श्रुथा ॥ ३७ ॥
धिग्धिग्विधेर्विलसितानि कदर्यमेव
यत्केवलं धनमनुक्षणमावृणोति ।
एको हि वारिधिरपेयपयोमयोऽय-
मस्यान्तरेव सरितः परिपूरयन्ति ॥ ३८ ॥
पद्मपालिषु मनाक्कुहेलिके हेलिकेलिपरिपन्थिनी भव ।
मुञ्च शीकरभरेण वारि वा वारिवाहपदवी दवीयसी ॥ ३९ ॥
त्वां दर्शयन्त्युदरमम्बुधिशुक्तयोऽन्त-
रासामवाकिर पयोधर वारिबिन्दून् ।
स्वातीमतीत्य पुनरेष्यति वारिदाना-
माधानसाधनमयं सुचिरेण कालः ॥ ४० ॥
कैः क्लान्तैस्तरुवीरुदादिभिरदः प्रत्याशया न स्थितं
केषां वा न पुनः प्ररोहमकरोदम्भोभिरम्भोधरः ।
एतैरत्र कथं मनोरथमहाभारोऽयमारोपितः
कस्मादेव समादधे किमथ वा संभाव्यते नोन्नते ॥ ४१ ॥
ऊषरे सरिति शाल्मलीवने दावपावकचितेऽपि चन्दने ।
तुल्यमर्पयति वारि वारिदे कीर्तिरस्तु गुणगौरवैर्गतम् ॥ ४२ ॥
धारासारेषु धाराधर इव तरवो नूतनोत्पन्नपर्णाः
पूर्णा नद्योऽपि सद्यो दिशि दिशि निखिलोल्लासभूवासभूमिः ।

भूयो भूयोऽपि काकुं कलयति विवृतत्रोटिरुद्भीविकायं
नायं प्राप्नोति पाथोलवमपकरुणा चातके तात केयम् ॥ ४३ ॥
नीरनिधेरपि नीचान्नाचामति चातकः प्रचुरमम्भः ।
अपि सीकरमुत्कन्धरमुन्नतमम्भोदमर्पयति ॥ ४४ ॥
मा धाव तात चातक वारिमुचां तारतम्येन ।
संमिलितजलदकोटिस्त्रोटिपुटीपूरमेव तोयं ते ॥ ४५ ॥
प्राप्य प्रावृषमखिलस्तवाधिकारः परोपकारस्य ।
परिहर पयोद चातकयाचनवैमुख्यपातकप्रणयम् ॥ ४६ ॥
अनुरूपमिदं कूप छद्मच्छन्नस्य किं न ते ।
सन्मार्गविभ्रमान्मार्गः पातोऽयं यन्निपातितः ॥ ४७ ॥
आलापं कलकण्ठिका न कुरुते कीरा न धीरस्वरं
व्याहारं कलयन्ति कोमलगिरः कूजन्ति नो बर्हिणः ।
लिम्बा(शिंपा)डम्बरदुर्दिने बत वने दूरे द्विरेफध्वनिः
काकाः केवलमेव कांकृतिकृतः कुर्वन्ति कर्णज्वरम् ॥ ४८ ॥
मलिनस्यागुरोरेष नामरूपसमक्रमः ।
तथोपलालितो नायं सुखाय ज्वालिते यथा ॥ ४९ ॥
लोचनं रचय चञ्चलतारं ·····ञ्चलमुदञ्चितहारम् ।
लास्यमन्यदिह पामरि किं चिन्नागरी हरति येन जगन्ति ॥ ५० ॥
अविश्रमालोकनदुर्भगाणि प्रव्यक्तवक्त्रस्तनमण्डलानि ।
अङ्गानि रे पामर कामिनीनामपुण्यतारुण्य किमाश्रितानि ॥ ५१ ॥
कति सन्ति नोन्नतिभृतास्तरवस्तदपि त्वमेव गुणकीर्तिवरः ।
न विलादरन्नवरमन्दहरः सहकार कारणमिह भ्रमरः ॥ ५२ ॥
सुखमास पङ्कजनिवासपरः सरसीषु विभ्रमरसी भ्रमधीः ।
समुपैति काननपथाप्यवशः स हि केसर त्वदनुरागरसः ॥ ५३ ॥
यदभङ्गि पङ्कजमखण्डि दलं न ततोऽवसीदति सरोजवनी ।
यदकारि कन्दकवलः करिणा परिणामतस्तदिह दुर्विषहम् ॥ ५४ ॥

पीत्वा मधूनि मधुपाः क्रोडे क्रीडन्तु कमलिन्याः ।
प्राणेशो रविरन्तर्विकसति यस्यावलोकनादस्याः ॥ ५५ ॥

एतावन्तं समयमलयः केसरोत्सङ्गरङ्गी
दृग्भङ्गीनां सततमहरस्त्वं सरःसंचरेषु ।
दैवादस्मिन्मधुप निपतन्कानने केतकीना-
मेतां दीनामनुपमदशां कीलितः कण्टकेषु ॥ ५६ ॥

स्वच्छन्दं सरसीषु सौरभमयं माध्वीकमास्वादय-
न्कल्लोलावलिदोलितेषु कमलक्रोडेषु विक्रीडसि ।
घिग्धूली कवलीकरिष्यसि तले सूचीचयानामले
गूढः स्थास्यसि मूढ यास्यसि यदि त्वं केतकीकाननम् ॥५७॥

धूलीभरो दृगवरोधमहान्धकारः
पत्राणि किंच करपत्रसहोदराणि ।
एतन्न चेत्परिमलत्वमलंकरोषि
स्यात्केन केतकतरोरितरोपयोगः ॥ ५८ ॥

जातिख्यातिभृतां हिताय जगतः स्वल्पापि संपत्सतां
भूयस्योऽपि जनस्य नोपकृतये नीचाश्रयिण्यः श्रियः ।
आमोदाय चिराय चन्दनतरोः क्षोदोऽपि चूर्णीकृतः
सर्वेषामफलः फलाचितमहाशाखोऽपि शाखोटकः ॥ ५९ ॥

त्वमप्यस्तव्यस्तो यदि भवसि जम्बाल यमित-
स्तृणस्तम्बे स्तम्बेरम किमवलम्बे न लभसे ।
विमुञ्च द्राक्चिन्ताभरमथ समस्तान्मदझर-
प्रपातैर्निःशङ्कं किमिति सरिदङ्कं न कुरुषे ॥ ६० ॥

बलं विशालं विपुलं वपुर्वा गर्वाद्वहन्तो विहरन्तु वन्याः ।
किं केसरी स्वं नखरं निधत्ते मत्तेभकुम्भान्तरमन्तरेण ॥ ६१ ॥

वारितवान्मदकरिणां नखरेण खरेण बृंहितं सिंहः ।
कुपितोऽपि तव न फेरव कण्ठरवं केन वारयतु ॥ ६२ ॥

आन्दोलयन्गिरिनिकुञ्जकरञ्जराजी-
नौजीगणः कलभ कंचन पौरुषेण ।
ईषत्समुन्मिलितलोचनकोण एव
कण्ठीरवे किमिति जीवितमुज्जिहासि ॥ ६३ ॥

रे दन्तावलशाव तावकमिदं कुत्रोर्जितं तर्जितं
कीदृग्वा गिरिकन्दरासु नितरां शुण्डारविस्फारणम् ।
भूयाद्वा किमिहाटवीविटपिनां शाखामुखामोटनं
स्याच्चेदेष विशेषतस्त्वयि घृणा कुण्ठो न कण्ठीरवः ॥ ६४ ॥

येषु प्राक्प्रकृतेषु निःसरदसृग्धारानुसारा पत-
न्मुक्ता(पात)निरन्तरालमभवत्कान्तारभूमीतलम् ।
पारीन्द्रस्य खरास्त एव नखराः स्यात्कुत्र तत्पौरुषं
शून्या एव मदुद्भटैः करटिभिर्भूभृत्तटीभूमयः ॥ ६५ ॥

इति श्रीहरिहरसुभाषिते प्रकीर्णकप्रकरणम् ॥ ११ ॥

सुभाषितैराहृतेभ्यो हृदयेभ्यो महीभृताम् ।
समाप्नुवन्ति सुधियः स्वयमेव समीहितम् ॥ १ ॥
सुभाषितेन विद्वांसः शूराः संग्रामकर्मणा ।
नीत्यामात्याः प्रजा वित्तैराहरन्ति महीभुजम् ॥ २ ॥
विद्वान्विदाप्यमादाय प्रेमभाजो महीभुजः ।
दर्शयित्वा फलं किंचिदनुज्ञातो निवर्तते ॥ ३ ॥
चिरं विलम्बो विदुषां विदेशेषु विगीयते ।
स्वल्पमप्यल्पकालेन तस्मादन्याहृतं हितम् ॥ ४ ॥
तवौचित्याम्महत्त्वस्य मास्तु न्यूनो मनोरथः ।
नोन्माद्य खेदयात्मानमप्यलीकमनोरथैः ॥ ५ ॥
नेष्यामि लक्ष्मीमेवेति प्रतिज्ञाय भ्रमन्भुवम् ।
प्रपेदे पुनराकृत्तिं न महादेवठक्कुरः ॥ ६ ॥

देशान्तरे वयो नीतं गतं लोकान्तरेऽपि वा ।
विभावयन्तु विद्वांसो बन्धूनां किं विशिष्यते ॥ ७ ॥
एकतोऽपरितोषश्चेदन्यमन्यं महीभुजम् ।
निदाघपान्थवच्छायामन्यामन्यामुपाश्रयेत् ॥ ८ ॥
राजानमन्यमन्यं यत्संश्रयन्ते मनीषिणः ।
राज्ञामेवं यशोमोषो नैष दोषो मनीषिणाम् ॥ ९ ॥
द्रष्टव्याः कष्टगम्येऽपि नगरे नगरे नृपाः ।
प्रापकादृष्टसंसृष्टः कश्चित्स्यादेव कस्यचित् ॥ १० ॥
चिरं विनिर्गमो बन्धुवर्गमोदापनोदनः ।
तस्मादपूर्णकामोऽपि समेत्य प्रवसेत्पुनः ॥ ११ ॥
धात्रा वक्रेण धनुषा गुणोत्कर्षेण मार्गणाः ।
अपि लब्धेषु लक्षेषु प्रक्षिप्यन्ते पुनः पुनः ॥ १२ ॥
अर्थानाहरतोऽनर्थाः समायान्ति प्रमादिनः ।
अप्रमत्तस्ततो मार्गो नित्यमेवास्तु वित्तवान् ॥ १३ ॥
हरिणाथो मनाक्पाथोमज्जनादर्जितं चिरात् ।
पथि प्रकटचोरेण हा धिग्धनमहारयत् ॥ १४ ॥
मारयन्ति नराः क्रूरा दूरादाहरतः प्रियम् ।
वाटपाटचरैर्नाशं नीतः शंकरठक्कुरः ॥ १५ ॥
अर्थस्योपार्जनं कष्टं कष्टमस्य गृहागमः ।
तस्यागतस्य बन्धुभ्यो विनियोगः सुखावहः ॥ १६ ॥
अर्थस्यानर्थपूर्णस्य कोऽवसीदतु संग्रहे ।
तत्संतुष्टेर्न चेदिष्टैर्दृष्टैः स्यान्नयनोत्सवः ॥ १७ ॥
तानि वित्तानि किं येषां विनियोगो न बन्धुषु ।
निन्द्या विद्यापि सा यस्या विनोदः स्यान्न संसदि ॥ १८ ॥
शरीरभरणेनैव पर्याप्नोति न पौरुषम् ।
परोपयोगशून्यस्य वैशाल्यं शाल्मलेरलम् ॥ १९ ॥

पुण्यरत्नभृतः पाणिः प्रार्थकेन प्रसार्यते ।
धान्यं तदङ्कमायाति माद्यन्मुकुलितः करः ॥ २० ॥
निन्दास्वार्याः कदर्याणामलं वाचां विलम्बनैः ।
यैर्याचितैर्मिषान्म्लाने कालिमास्ये स्वयं धृतः ॥ २१ ॥
आर्थिनो जठरज्वाला दग्धा वाक्कंचिदञ्चति ।
तां च समयतो वित्तं किं निमित्तं न विद्महे ॥ २२ ॥
वर्तुलैरप्यलं वित्तैर्यत्तैर्नोपार्जितं यशः ।
लक्षैर्नवभिरप्यासीत्काशीमिश्रोऽप्यनामकः ॥ २३ ॥
विद्यामध्यापनैर्दानैर्वित्तं नित्यमलं कुरु ।
पुरा कीर्तिर्वटेशादीनाविवेशामुनाध्वना ॥ २४ ॥
सर्वस्याप्यविशिष्टं तद्धनं यन्नोपयुज्यते ।
चौरादिभीत्या धनिनां निशौन्निद्यं विशिष्यते ॥ २५ ॥
धने किमिति कार्कश्यं निधने यद्विमुञ्चति ।
यन्न मुञ्चति पर्यन्ते तदर्जय धनैर्यशः ॥ २६ ॥
आतरापूर्यसे वित्तैर्दीयतां दीयतामिदम् ।
जलेनानपनीतेन पूरिता नौर्निमज्जति ॥ २७ ॥
धारणेनालमेतस्य विपरीतमिदं धनम् ।
धृतं न प्राप्यते भूयस्त्यक्तं भूयोऽप्यवाप्यते ॥ २८ ॥
विनोदः साधुभिः सार्धं प्रतिपादनमर्थिषु ।
विद्याश्रियोर्द्वयोरेतच्चिरोपार्जितयोः फलम् ॥ २९ ॥
विद्या विनोदैर्विदुषां वरीयान्वयसो व्ययः ।
श्रेयस्यो दानभोगाभ्यां श्रियो निःशेषिता अपि ॥ ३० ॥
विनयेन वदान्यत्वं मदास्पर्शेन पौरुषम् ।
पूर्वेण तपसा पुंसां द्वाभ्यां द्वयमलंकृतम् ॥ ३१ ॥
नम्रीभूया भृशं आतर्यद्यस्ति फलगौरवम् ।
चेदनम्रं शिरः शालेरिव तुच्छं फलं तव ॥ ३२ ॥

परोपकृतये जाताः साधवः शालयो यथा ।
शिरश्छेदेऽपि नोज्झन्ति फलसंपत्तिनम्रताम् ॥ ३३ ॥
नीचाशयानां संपत्तिः प्रतिवेशिविपत्तये ।
निपाताय तटस्थानां सद्यो नद्योऽम्बुपूरिताः ॥ ३४ ॥
धनाभिजनविद्याभिर्यद्यायातो न दुर्मदः ।
गोविन्दानुगृहीतोऽयमिति हीतोऽवधार्यताम् ॥ ३५ ॥
मदोन्मादविहीनेन सततं प्रियवादिना ।
क्रीतमेतत्सुकृतिना जगदेवाकपर्दकम् ॥ ३६ ॥
अस्मिन्परस्परद्वेषपरुषे पुरुषायुषम् ।
केवलं मधुरा वाणी ददात्यानीय सौहृदम् ॥ ३७ ॥
ये सतामवमन्तारस्ते गन्तारः पराभवम् ।
स्वाराज्यान्नहुषो विप्रावलेपाद्विनिपातितः ॥ ३८ ॥
आचरन्बहुभिर्वैरमल्पकैरपि नश्यति ।
जनैः प्रत्यायितोऽमात्यं प्रेतमित्यत्यजन्नृपः ॥ ३९ ॥
विरोधेनाधमस्यापि न महानपि मोदते ।
अपि दासीकृतेनासीद्वनवासी रघूद्वहः ॥ ४० ॥
परिष्वङ्गोऽपकर्षाय हीनजातिषु जायते ।
रामस्यापि कपिः स्कन्धमारुरोहादृतः पुरा ॥ ४१ ॥
जन्म तन्मन्महे धन्यं संसर्गो यत्र सत्तमैः ।
सौभाग्यं पश्य निम्बस्य चन्दनाचलजन्मनः ॥ ४२ ॥
एको गोत्रे पुमान्प्रोक्तः प्राक्तनैः स्वकुटुम्बभृत् ।
एकोऽप्यनेकः पुरुषः परेषां भरणक्षमः ॥ ४३ ॥
को निजः कः परो लोके शोकेनाद्यो विशिष्यते ।
निजः स एवोपकृते यशो यत्रावशिष्यते ॥ ४४ ॥
व्ययमायक्रमेणैव कुर्वन्त्यायतिदर्शिनः ।
यावदास्तरणं पादप्रसारणमिति स्थितिः ॥ ४५ ॥

क्षयाय जायते पुंसामायादत्यधिको व्ययः ।
मिताशी योषितां रन्ता किं तात सुखमेधते ॥ ४६ ॥
अविचारेण यत्कर्म कृतं तन्मर्मकृन्तनम् ।
प्रसह्य सीताहरणादतीता रावणश्रियः ॥ ४७ ॥
संपद्यमानमालोक्य श्रेयः सद्यः समाचरेत् ।
दहत्यामरणं कर्म विलम्बेन विनाशितम् ॥ ४८ ॥
कष्टं कर्मेति दुर्मेधाः कर्तव्याद्विनिवर्तते ।
न साहसमनारभ्य श्रेयः समुपलभ्यते ॥ ४९ ॥
किं वा बहुभिराख्यातैस्तत्कुर्वीथाश्चिरं यथा ।
त्वां गायति सतामग्रे यशोभिरवशो जनः ॥ ५० ॥
एकं तु लोकवेदेभ्यः सारमाकृष्य कथ्यते ।
प्राणात्ययेऽपि न त्याज्यो न्याय्यो धर्मात्पथः पथः ॥ ५१ ॥
अत्यल्पं जीवितं पापान्यापातमधुराण्यलम् ।
तदाचर चिरास्तेयपरलोकावलोकनम् ॥ ५२ ॥
अवधारय धर्मेषु प्रधानमवधानतः ।
निर्भरानन्दकन्दाय गोविन्दाय मनोऽर्पय ॥ ५३ ॥
कुर्युः के वा न सेवाभिर्देवास्ते वाञ्छितां श्रियम् ।
बाञ्छातीता चिरस्फीता प्रीतात्पीताम्बरादियम् ॥ ५४ ॥
आकर्ण्य वाणीः पौराणीर्मयैतदवधारितम् ।
तिष्ठन्तु देवदेव्योऽपि सेव्यो नारायणः परः ॥ ५५ ॥
स्मरत्यहह किं कामी यामीमपि न यातनाम् ।
यन्न ध्यायति गोविन्दमरविन्दविलोचनम् ॥ ५६ ॥
नाम नामरणं मुञ्च नामिनोऽप्यधिकं हरेः ।
यदेतेनानुरक्तेन तत्तेनोक्तेन लभ्यते ॥ ५७ ॥
पश्यामि त्वामरे मूढ गूढमज्ञानवारिधौ ।
स्मर संसारसंतारकारणं चरणं हरेः ॥ ५८ ॥

कामात्क्लाम्यति कारीतिर्नारीति नरकाभिधा ।
मलमज्जमयी मांसस्तुगी किं न विगीयते (?) ॥ ५९ ॥
दुःखनित्यानि वित्तानि त्वं किमासाद्य माद्यसि ।
ये भोक्तुमेतानीच्छन्ति तानेतान्येव भुञ्जते ॥ ६० ॥
किं ते पुत्रेण मित्रेण धनेनाभिजनेन वा ।
सर्वं शोकाय लोकानामाकाशनगरायितम् ॥ ६१ ॥
अलं वा बहुवादेन यत्र यत्रानुरज्यसे ।
तत्र तत्रैव ते दुःखदावपावकपङ्क्तयः ॥ ६२ ॥
साम्यं कुरु सुते शत्रौ कीटकोटीशयोरपि ।
समो जीवस्तमोरूपं न भावमनुधावति ॥ ६३ ॥
भोगारीणां न शक्तोऽसि यादवारिनिवारणे ।
अनौत्सुक्यमयं वर्म मनोवर्मणि धारय ॥ ६४ ॥
अनाविलं फलं भुङ्क्ते विषयाणामनुत्सुकः ।
उत्सुको लब्धरोकेण तत्र शोकेन शीर्यते ॥ ६५ ॥
मा शुचो वार्मुचो वृष्टिर्लोकसृष्टिश्च वेधसः ।
उत्पद्यते विनाशाय क्षणरक्षणलक्षणः ॥ ६६ ॥
दुःखभारापहाराय नारायणमयं जगत् ।
आत्मनश्चिन्तया भेदाद्भेदातीतो भविष्यसि ॥ ६७ ॥
काप्याकारे हरेः सम्यङ्नियम्य सुचिरं मनः ।
धियं निर्विषयं नीत्वा प्रकाशाकाशमाविश ॥ ६८ ॥
प्रक्षिप्य पक्षिवद्बन्धं स्वच्छीयाकाशमाश्रय ।
पदादास्तामधस्तात्ते मेरोरपि शिरो गतः ॥ ६९ ॥
समाधाय धियां धारां निराकारां चिदम्बरे ।
आत्मानमाप्नुहि श्रातरासमोक्षमधोक्षजम् ॥ ७० ॥
लक्ष्मीराघवयोः सूनोरन्यूनोऽयं गिरां गुणैः ।
सुभाषितानां संक्षेपः प्रेक्षावद्भिः परीक्ष्यताम् ॥ ७१ ॥

वाग्देवीकरपद्मपञ्जरपठत्कीरायितानां पुरो
गण्यन्ते कवयः क्व वाङ्मयपुरप्राकारकाकायिताः ।
ब्रह्मास्वादसुखावखातमनसां गोष्ठीषु सांसारिकाः
स्वर्गोत्सङ्गनिषादिनोऽपि कुररीपाका वराका इव ॥ ७२ ॥

इति हरिहरसुभाषिते परमार्थप्रकरणम् ॥ १२ ॥

समाप्तश्चायं ग्रन्थः ॥